प्रकृता **श्रीनागपुरे** समर्थित**ताणहिल्लपाटके** नगरे। अब्धिमुनिरुद्रसङ्ख्ये(११७४) वहमाने वैक्रमे वर्षे॥६॥
दृष्ट्वा यच्चाशक्त्या सुनिपुणतथारूपबोधादृते वा यच्चाभोगाभवनवशतो हीनमत्राधिकं वा।
किञ्चित् कस्मिंश्चिदपि च पदे **दृब्धमुत्तार्य** धीरस्तन्मे धर्मं घटयितुमनाः शोधयेच्छास्त्रमेतत्॥७॥
विप्रेण **केशवे**नैषा प्रागादर्शे निवेशिता। अत्यन्तमुपयुक्तेन शुद्ध्यशुद्धी विजानता॥९॥"

[**धर्मबिन्दुवृत्ति**कृत **आचार्यश्रीमुनिचन्द्रसूरे**र्विषये तच्छिष्यैर्वादिदेवसूरिनाम्ना प्रसिद्धै**राचार्यश्रीदेवसूरिभि**र्विरचितं कृतिद्वयमत्र मालवदेशान्तर्गतरतलामनगरस्थया 'ऋषभदेवजी केशरीमलजी' नाम्न्या जैनसंस्थया १९८० तमे वैक्रमे वर्षे प्रकाशितात् **प्रकरणसमुच्चयात्** उद्धृत्य मुद्र्यते]

तिहुयणपणमियचरणं पणमित्तु जिणेसरं महावीरं। वोच्छं पभायसमए जीवस्साणुसासणं इणमो॥१॥
धन्नाणं जीवाणं संसारपरम्मुहाण सइ होई। कल्लाणकोसजणणी पभायसमयम्मि इइ चिंता॥२॥
धन्नोऽहं जेण मए संसारमहन्नवम्मि बुड्डेणं। नीरंधपवहणसमो पत्तो जिणदेसिओ धम्मो॥३॥
चिंतारयणं करयलमल्लीणं अज्ज मज्झ पुन्नेहिं। कामदुहा वि य धेणू सयमेव धरंगणे पत्ता॥४॥
फलभरविणमियसालो सुरद्दुमोत्तग्ग(आग)ओ घरदुवारे। सच्चंकारो दिन्नो सग्गसिवसुहाण मे अज्ज॥५॥
हिंडंतेण भववणे जं पत्तो कहवि सत्थवाहसमो। भवसयसहस्सदुलहो जिणिंदवरदेसिओ धम्मो॥६॥
अन्नं च मए लद्धो अइदुलहो लोयलोयणसमाणो। माणगिरिकुलिसदंडो पयंडपासंडनिद्दलणो॥७॥
अइसयरयणजलनिही दुज्जणजलदुलहदंसणो धणियं। भवियजियकमलसूरो सासयसुहनीरवरपूरो॥८॥
कम्मकलंकविमुक्को कसायदवतवियभवियजलवाहो। तिहुयणलच्छीवच्छत्थलम्मि अइनिम्मलो हारो॥९॥
उग्गतवातेयतरणी पुड(र)पयडियमोक्खपवरपुरसरणी। चंदकरधवलकित्ती लीलाए दिन्नजियमुत्ती॥१०॥
केवलपईवपयडियजीवाजीवाइवत्थुपरमत्थो रागाइविजयवीरो देवो तित्थंकरो वीरो॥११॥
जिणभणियवयणनिरया विरया सव्वेहिं पावठाणेहिं। एत्तोच्चिय पंचमहव्वयाण परिपालणे पवणा॥१२॥
मणवयणकायगुत्ता पुत्ता सीमंतिणीण सव्वाणं। अनिययविहाररसिया वसिया गुरुपायमूलम्मि॥१३॥
तित्थयरभणियवयणाणुसारिसद्धम्मदेसणपहाणा। पडिखलियपंचबाणा निरंतरुल्लासिसुहझाणा॥१४॥
सीलंगमहाभरधारणम्मि धुरधवलधीरिमं पत्ता। रागाइवेरिवसवत्तिजंतुपरिमोयणे सत्ता॥१५॥
गुणिमणकमलवियासणपयंडमायंडसंनिहसहावा। संपत्ता सुहगुरुणो दुहतरुणो खंडना धीरा॥१६॥
ता जीव! तं कयत्थो कयपुन्नो मंगलाण आवासो। माणुसजम्मस्स फलं तुब्भच्चिय करयले चडियं॥१७॥
जं तुमए रयणत्तयमिणमो संपावियं महाभागा!। नहि पुन्नविहीणाणं निहाणलाभो जए होइ॥१८॥

## धर्मबिन्दोः स्वरूपम्

धर्मबिन्दुप्रकरणस्य अष्टौ अध्यायाः। प्रत्यध्यायमादौ त्रयः श्लोका अन्ते च त्रयः श्लोका इत्येवं सर्वसङ्ख्यया ४८ श्लोका अत्र सन्तिः। मध्ये गद्यरूपाणि सूत्राणि वर्तन्ते। प्रथमेऽध्याये ५८, द्वितीये ७५, तृतीये ९३, चतुर्थे ४३, पञ्चमे ९८, षष्ठे ७६, सप्तमे ३८, अष्टमे ६९ इति सर्वसङ्ख्यया ५४२ सूत्राणि अत्र सन्ति। सर्वमपीदं संस्कृतभाषया निबद्धम्।

---

ता तह करेसु संपइ मोत्तूणं मोहणिज्जमचिरेणं। जह संसारसमुब्भवदुक्खाण जलंजलिं देसि॥१९॥
रयणायरम्मि पत्ते जह पुन्नो कोऽवि लेइ रयणाइं। तह गिण्ह तुमं लद्धयमाणुस्सो भावरयणं पि॥२०॥
जइ कुणासि पुण पमायं जाणंतोऽविहु जिणिंदधम्मम्मि। ता नूणमयाणुय! करगयाइं सोक्खाइं हारिहिसि॥२१॥
इय चिंतामयसंसिच्चमाणमणनंदणाण जीवाण। अचिरेण सग्गसिवसुहफलाइं सिज्झंति विउलाइं॥२२॥
**मुणिचंदसूरि**गणहरविणेयसिरिदेवसूरिवयणाइं। मोहंधयाण जंतूण होंति विमलाइं नयणाइं॥२३॥ इति॥
अथ दोहा—
नाणु चरणु सम्मत्तु जसु रयणत्तउ सुपहाणु। जय सु मुणिसुरि इत्थु जगि मोडियवम्महरबाणु॥१॥
उवसमरयणसमुद्दसमु विहलियजणसाहारु। वंदउ मुणिसुरि भवियजण जिम छिंदउ संसार॥२॥
अमियमहुरदेसणरसिण भवियण रुंखमुलाइं। जिंव सिंचइ **मुणिचंदह** सूरि तिअ तुंवि कुवि काइं॥३॥
वक्खाणंतउ जिणवयणु सिरिमुणिचंद मुणिंद। चउदिसि मुणिपरिवारियउ, नावइ पुन्निमचंदु॥४॥
जिणि छट्ठट्ठमिमाइतवि सोसीउ इहं नियदेहु। वरकरुणाजलणीरुनिहि सो गुरु मुणिधुरिलेहु॥५॥
जो पिहि **पक्खसमुद्धरणु, पंचमहव्वयधारु।** सो नंदउ **मुणिचंद**सुरि, जिणी वूहउ तिव भारु॥६॥
मेरुह जिंव विरु पब्भ गुरु, सायरु जिम्ह गंभीरु। सिरी **मुणिसुरि** नवनाणनिहि जच्चसुवन्नसरीरु॥७॥
जं संसारमहाडविहिं निवडियजणसत्थाहु। सो गुरु **मुणिसुरि** सुमरियइं सरणविहीणइं नाहु॥८॥
जिंव तारयहिं पहाणु ससि सेलहिं मेरु पहाणु। तिंव सूरिहिं **मुणिचंद**मुणि गरुयउ निज्जियमाणु॥९॥
मोहमहाचलि कुलिससमु सुयजलपूरियापारु। सुविहियमुणिसिरि सेहरउ **मुणिसुरि** बालकुमारु॥१०॥
ता मज्जहि परतित्थिया जा नवि कोइ कहेइ। जिणसासणि उज्जोयकरु **मुणिसुरि** एत्थु वसेइ॥११॥
ते धन्ना घर गावडां जहिं विहरइ **मुणिसूरि**। हरइ मोहु फेडइ दुरिउ संसओ घल्लइ दूरि॥१२॥
कुंददलुज्जलजसपसरधवलियसयलतिलोय। कम्मपयडिपयडणपवणु **मुणिसुरि** नमहु असोउ॥१३॥
जिण कुग्गह फेडिय नरह पयडिविनिम्मलनाणु। सो **मुणिसुरि** महु माइ गुरु अइमणहरसंठाण॥१४॥
**मुणिसूरिहिं** जितणा गुणा तहिं को संख मुणेइ?। किं रयणायरु कुवि मुणिवि रयणह संख कहेइ?॥१५॥
दुद्धरदप्पगइंदहरि कोइलकोमलवाणि। सो **मुणिचंदु** नमेहु पर संजमरयणह खाणि॥१६॥
**हरिभद्दसुरि**कयगंथ जिणिंवक्खाणिय नियबुद्धिं। सो **मुणिचंदु** नमेह पर जिव पावहु वर सुद्धि॥१७॥
जिव बोलइ तिम जो करइ सीलु अखंडु धरेइ। **मुणिसुरि** पंडियतोसयरुपण्हुत्तरइ दलेइ॥१८॥
जिंव महुयर आवइं कमलि गंधाइड्ढियसत्त। तिम **मुणिसूरिहि** सीसगण सुयमयरंदासत्त॥१९॥
जहिं विहरइ **मुणिचंदसुरि** तहिं नासइ मिच्छत्तु। चरइ नउलु जहिं ठावडइ सप्पु किं हिंडइ तत्थु?॥२०॥
जिम्ह मेहागम तोसियहिं मोरहतणा निकाय। तिम्ह **मुणिसूरिहिं** आगमणि भवियाणं समुदाय॥२१॥
सरयागमि जिव हंसुला हरिसिज्जंति न मंति। **मुणिसुरि** पडिखडिया जणा तुह आगम निब्भंति॥२२॥
तिह मणुयहं गउ विहल जम्मु जेहिं न **मुणिसुरि** दिट्ठु। किंव जच्चंधिहि लोयणिहिं जेहिं न ससिहरु दिट्ठु॥२३॥
जाह पसन्ना तुह नयण तह मणुयह सय कालु। हियइच्छिय सुह संपडहिं अनुछिंदहि दुहजालु॥२४॥
दूसमरयणिहिं सूर जिम्व तुह उट्ठिउ मुणिनाह। सिरि**मुणिचंद**मुणिंद पर महु फेडइ कुग्गाह॥२५॥
इति श्री**मुनिचन्द्राचार्य**स्तुतिः॥

**विषयः**

गृहस्थधर्म-यतिधर्मविषयेऽत्यद्भुतोऽयं ग्रन्थः। न केवलं जैनवाङ्मये, भारतीयवाङ्मयेऽपि अत्यद्भुतोऽयं ग्रन्थः। इहलोक-परलोकयोः सुखार्थं सर्वैरपि गृहस्थैर्यतिभिश्च अवश्यमेव मननीयोऽयं ग्रन्थः। अत्र के के विषया वर्णिता इत्यादि सर्वं विषयानुक्रमावलोकनेन ज्ञातव्यम्।

**समयः**

"पंचसए पणसीए विक्कमकालाओ झत्ति अत्थमिओ। हरिभद्दसूरिसूरो भवियाणं दिसउ कल्लाणं॥"

इति तत्र तत्रोप[१]लभ्यमानगाथानुसारेण वैक्रमे५८५ वर्षे आचार्यश्री**हरिभद्रसूरयो** दिवङ्गता इति परम्परानुसारिण आमनन्ति। अपरे तु इतिहाससंशोधका **हरिभद्रसूरि**निर्दिष्टग्रन्थकाराणां समयं मनसि निधाय वैक्रमेऽष्टमे शतके **हरिभद्रसूरय** आसन्निति कल्पयन्ति सम्भावयन्ति वा, परमेतत् कथञ्चित् सन्दिग्धं विचारणार्हं मतम्।

आचार्यश्री**हरिभद्रसूरि**विरचितानां ग्रन्थानां सूचिः श्रीमद्य**शोविजयोपाध्याय**विरचित-स्याद्वादकल्पलता-टीकासहितस्य आचार्यश्री**हरिभद्रसूरि**विरचित**शास्त्रवार्तासमुच्चयस्य** हिन्दीभाषान्तरसमेतस्य प्रथमे विभागे मुनिराजश्री**जयसुन्दरविजयै**र्या उल्लिखितास्ति तदनुसारेणात्रोपन्यस्यते—

**[१] सम्प्रत्युपलब्ध-स्वोपज्ञटीकायुक्तो ग्रन्थकलापः-**

(१) अनेकान्तजयपताका (२) पञ्चवस्तुप्रकरणम् (३) योगदृष्टिसमुच्चयः (४) योगशतकम् (५) शास्त्रवार्तासमुच्चयः (६) सर्वज्ञसिद्धिः (७) हिंसाष्टकावचूरिश्च।

**[२] अन्यकर्तृकग्रन्थटीकास्वरूपः सम्प्रत्युपलब्धो ग्रन्थराशिः-**

(१) अनुयोगद्वारलघुवृत्तिः (२) आवश्यकसूत्रलघुटीका (शिष्यहिता) (३) ललितविस्तरा (४) जीवाभिगम-लघुवृत्तिः (५) दशवैकालिकलघुवृत्तिः (६) दशवैकालिकबृहद्वृत्तिः (७) ध्यानशतकवृत्तिः (८) नन्दीसूत्रटीका (९) न्यायप्रवेशकटीका (१०) पञ्चसूत्रपञ्जिका (११) पिण्डनिर्युक्तिटीका (१२) प्रज्ञापनाप्रदेशव्याख्या (१३) तत्त्वार्थसूत्र-लघुवृत्ति (१४) लघुक्षेत्रसमासवृत्तिः (१५) श्रावकप्रज्ञप्तिवृत्तिश्च।

**[३] सम्प्रत्युपलभ्यमानाः स्वतन्त्रग्रन्थरचनाः-**

(१) अनेकान्तवादप्रवेशः (२) अष्टकप्रकरणम् (३) उपदेशपदप्रकरणम् (४) दर्शनसप्तसिका (५) देवेन्द्रनरकेन्द्र-प्रकरणम् (६) धर्मबिन्दुः (७) धर्मसङ्ग्रहणी (८) धूर्ताख्यानम् (९) नाणाचित्तपयरणं (१०) पञ्चाशकप्रकरणम् (११) ब्रह्मप्रकरणम् (१२) यतिदिनकृत्यम् (१३) योगबिन्दुः (१४) लग्नशुद्धिः (१५) लोकतत्त्वनिर्णयः (१६) विंशतिविंशिका (१७) षड्दर्शनसमुच्चयः (१८) षोडशकप्रकरणम्

---

१ भूयस्सु ग्रन्थेषूद्धृतेयं गाथा॥

(१९) समराइच्चकहा (२०) सम्बोधप्रकरणम् (२१) ज्ञानपञ्चकव्याख्यानम् (२२) बोटिकप्रतिषेधः (२३) सम्यक्त्वसप्ततिका (२४) संसारदावानल० स्तुतिः

**[४] अनुपलब्ध-सङ्केतप्राप्तग्रन्थसमूहः-**

(१) अनेकान्तप्रघट्टः (२) अनेकान्तसिद्धिः (३) अर्हच्छ्रीचूडामणिः (४) आत्मसिद्धिः (५) आवश्यकसूत्रबृहट्टीका (६) उपदेशप्रकरणम् (७) उपदेशमालाटीका (८) ओघनिर्युक्तिवृत्तिः (९) कथाकोषः (१०) कुलकानि (११) क्षेत्रसमासवृत्तिः (१२) चैत्यवन्दनभाष्यम् (१३) जम्बूद्वीपप्रज्ञप्तिटीका (१४) जम्बूद्वीपसङ्ग्रहणी (१५) त्रिभङ्गीसारः (१६) दिनशुद्धिः (१७) द्विजवदनचपेटा (१८) धर्मलाभसिद्धिः (१९) धर्मसारः (२०) न्यायावतारवृत्तिः (२१) पञ्चनिर्ग्रन्थीप्रकरणम् (२२) पञ्चलिङ्गिप्रकरणम् (२३) पञ्चस्थानकप्रकरणम् (२४) परलोकसिद्धिः (२५) बृहन्मिथ्यात्वमथनम् (२६) भावनासिद्धिः (२७) सङ्ग्रहणीवृत्तिः (२८) सम्बोधसित्तरी (२९) संस्कृतात्मानुशासनम् च।

**आचार्यमुनिचन्द्रसूरयो** वैक्रमे ११७८ तमे वर्षे दिवङ्गता इति अस्माभिः प्रागेव निर्दिष्टम्, इति ततः पूर्वमेवासन्।

एतैर्विरचितानां ग्रन्थानां सूचिः **उपदेशपदवृत्ते**र्द्वितीयविभागस्य प्रस्तावनायां या उपन्यस्ता सात्र तथैवोपन्यस्यते— "कुलकप्रभृतिस्वतन्त्रग्रन्थरचनात्वेन अन्यकृतग्रन्थोपरि-टीका-विवरणचूर्णिटीप्पनकादित्वेन चानल्पाः कृतयो दृश्यन्ते श्रूयन्ते च। ताश्चेमाः —

(१) वनस्पतिसप्ततिः, (२) अङ्गुलसप्ततिः, (३) आवश्यक(पाक्षिक)सप्ततिः, (४) कालशतकम्, (५) गाथाकोशः, (६) अनुशासनाङ्कुशकुलकम्, (७) उपदेशामृतकुलकम्, (८) उपदेशामृतकुलकं द्वितीयम्, (९) उपदेशपञ्चाशिका, (१०) धर्मोपदेशकुलकम्, (११) धर्मोपदेशकुलकं द्वितीयम्, (१२) प्राभातिकस्तुतिः, (१३) मोक्षोपदेशपञ्चाशत्(क), (१४) रत्नत्रयकुलकम्, (१५) शोकहर-उपदेशकुलकम् (१६) सम्यक्त्वोत्पादविधिः, (१७) सामान्यगुणोपदेशकुलकम्, (१८) हितोपदेशकुलकम्, (१९) रसाउलो- [प्राकृतात्मकः] (२०) तीर्थमालास्तवः।

टीकादि— (२१) ललितविस्तरापञ्चिका, (२२) अनेकान्तजयपताकाटीप्पनकम्, (२३) देवेन्द्रनरकेन्द्रप्रकरणवृत्तिः, (२४) धर्मबिन्दुविवृत्तिः, (२५) योगबिन्दुवृत्तिः, (२६) कर्मप्रकृतिविशेषवृत्तिः [टीप्पनम्], (२७) सार्धशतकचूर्णिः, (२८) उपदेशपदसुखसम्बोधनीवृत्तिः,। श्रीउदयप्रभसूरिकृतप्रवचनसारोद्धारविषमपद पर्यायस्य संशोधकत्वमप्येतेषां तत्तद्ग्रन्थान्ते॥

वि.सं. २०४९ वैशाख कृष्ण दशमी

पूज्यपादाचार्यमहाराजश्रीमद्विजय**सिद्धिसूरी**श्वरपट्टालङ्कार-
पूज्यपादाचार्यमहाराजश्रीमद्विजय**मेघसूरी**श्वरशिष्यरत्न-
पूज्यपादगुरुमुनिराजश्री**भुवनविजया**न्तेवासी
**मुनिजम्बूविजयः**

# સમર્પણ

જેમણે

અંકલેશ્વરમાં મહારાજજીનું એક વ્યાખ્યાન સાંભળી

પોતાનું જીવન બદલી નાંખ્યું,

તપ, જપ અને જયણામાં જીવન પરોવી દીધું,

મોટી ઉંમરે સંયમ પામી કઠોર સાધના પ્રારંભી

તે નામ પ્રમાણે ગુણ ધરાવતા

**મુનિરાજ શ્રી સંયમરતિ વિજયજી મ. સા. ને**

॥ऐँ॥

**सूरिपुरन्दराचार्यश्रीहरिभद्रसूरिविरचितः**

# ॥धर्मबिन्दुः॥

**[सङ्गतिवृत्तिसहितः पञ्चमाध्यायः]**

अनन्तोपकृतां श्रीमदर्हतां जिनशासनम्।
नत्वा सिद्धाँश्च सूरींश्च वाचकाँश्च मुनीँस्तथा।

स्वगुरूँश्च हृदि ध्यात्वा हरिभद्रसूरीशितुः।
**धर्मबिन्दो**र्बोधसिन्धोः पञ्चमाध्ययनस्य वै।

यतित्वे रममाणानां भावशुद्धिविधायिका।
क्रियते बालबोधाय लेशोद्देशेन सङ्गतिः॥

इह हि अनाद्यनन्तस्य खल्वस्य जिनशासनस्य स्थापकाः श्रीमन्तोऽर्हन्तः स्वीयानुपमयोग्यतानुभावेन सद्गुरुयोगादवगतसन्मार्गा मिथ्यात्वविषमुद्वम्य सम्यक्त्वसुधामास्वादयन्ति। यतः प्रभृति भगवन्तः सम्यक्त्वम् आसादितवन्तः, ततः प्रभृति ते दुःखपङ्कनिमग्नसकलजगज्जीवविषयिण्या भावदयायाः स्वामिनो भवन्ति। पूर्वतने तृतीये भवे प्रोल्लसितभावदयाः त एवमध्यवसन्ति यदुत—यद्यहं शक्नुयां तर्हि विश्वविश्वजनानेवं प्रतिबोधयेयं यत्- यदि दुःखरूपात् संसारादात्मानं रक्षितुकामा भवन्तः तदापहाय विषयकषायरसम् आर्हते प्रवचनेऽनुरक्ता भवत इति। अध्यवसायस्यास्य प्रभावात्ते तीर्थकृन्नामकर्म निकाचयन्ति। भवान्तरालेन तीर्थङ्कर-रूपेण आसाद्यानुपमपुण्यप्राग्भारोपेतं मनुजजन्म, तृणवत् परित्यज्य राज्यवैभवादिकं समस्तमपि वैषयिकं सुखम्, प्रतिपद्य अनगारभावम्, प्रसह्यातिघोरानुपसर्ग-परीषहान्, उत्पाट्य समूलं मोहनीयादिकर्मजालम् वीतरागाः सर्वज्ञाश्च सन्तो जगद्धितार्थमेव धर्मशासनं प्रवर्तयन्ति। धर्मदेशनायां सर्वेऽप्यर्हन्तः समुपदिशन्ति यत्-संसारोऽयं दुःखरूपो दुःखफलको दुःखानुबन्धी चास्त अत एव हेय इति। पूर्वभवार्जितप्रचुरपुण्योपलभ्यमपि सुखमासञ्जयति जीवं संसारे। अत एव अतिविषमदुःखपरम्पराजनकत्वेन सांसारिकसुखस्य हेयत्वं सञ्जानाना विवेकिनः संसारमसारं मन्यन्ते। विदिताखिलसंसारनैर्गुण्या दुःखैकफलकसुखनिर्विण्णा संवेगमापन्नाश्च ते मुक्तिमेव अभिलषन्ति। त एव लोकोत्तरस्य धर्मशासनस्याधिकारिणो भवन्ति। संसारोद्विग्ना मोक्षार्थिनो जीवा एव अर्हदाज्ञां सम्प्रज्ञातुमर्हा भवन्ति। भगवदाज्ञाराधनमेव च मोक्षस्य परम उपायः। तदुक्तम्-

***आज्ञाराद्धा विराद्धा च शिवाय च भवाय च।*** इति

[वीतरागस्तोत्रम्-१९.४]

श्रोतव्यस्य श्रवणम्, ज्ञेयस्य ज्ञानम्, हेयस्य हानम्, उपादेयस्य चोपादानमित्येव भगवदाज्ञासर्वस्वम्। तदुक्तम्—

*हेयं हानोचितं सर्वं कर्तव्यं करणोचितम्।*
*श्लाघ्यं श्लाघोचितं वस्तु श्रोतव्यं श्रवणोचितम्॥*

[उपमितभवप्रपञ्चकथा प्रस्ताव-१]

रागद्वेषौ विहाय नान्यत् चित्तमालिन्यकारणम्। तयोश्च हानिः श्रामण्येन सम्पद्यते। एवं च चातुर्गतिकात् संसारान्मुक्तेरुपायभूतः यतिधर्म एवेति स्थितम्। स च मनुजगतावेवावाप्यत इति मनुजगतिरतीवदुर्लभेति तत्र तत्र शास्त्रे वर्णितम्। सोऽयं यतिधर्मः सकलसुखपरित्यागदुःख-तितिक्षापूर्वको पञ्चमहाव्रतरूपश्च भवति। तदुक्तम्-

*हिंसानृतास्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम्॥*
*देशसर्वतोऽणुमहती॥* इति [तत्त्वार्थसूत्रम्-७.१,२]

पञ्चानामपि महाव्रतानां परिपालनार्थमनेके नियमा उपदिष्टा भगवद्भिः। तदेतान् नियमान् प्रतिपादयितुकामः समर्थः शास्त्रकारः श्रीहरिभद्रसूरिः श्रावकधर्मप्रतिपादनानन्तरं क्रमप्राप्तं यतिधर्मं पञ्चमेऽध्याये प्रतिपादयति। तत्रादावेव यतिधर्मस्य दुरनुचरत्वं त्रिभिः श्लोकैर्दर्शयति—

**बाहुभ्यां दुस्तरो यद्वत् क्रूरनक्रो महोदधिः।**
**यतित्वं दुष्करं तद्वदित्याहुस्तत्त्ववेदिनः॥५.१॥**

**बाहुभ्यामि**ति। सुगमः। नवरं क्रूरा नक्रा यस्मिन् स क्रूरनक्रः। भावार्थः पुनरयम्—प्रथमं तावत् सम्यक्त्वमेवातीव दुर्लभम्। भावयतित्वं च ततोऽपि दुर्लभम्। सम्यक्त्वविरहितो यतिवेषो विडम्बनामात्रः। यतिवेषमात्रेण कल्याणं दुष्करम्। तदाहुः श्रीहरिभद्रसूरयः षोडशके—

*बाह्यं लिङ्गमसारं तत्प्रतिबद्धा न धर्मप्रतिपत्तिः।*
*यस्माच्च कार्यवशतो धारयति विडम्बकोऽप्येतत्॥* इति [षोडशकम् १.४]

तीर्थकृतां गणभृतां च भावदययैव दुरनुचरोऽपि यतिधर्मोऽस्मादृशैर्हीनसत्त्वैरपि सम्प्राप्यते सम्पाल्यते च। यथानेकैर्जलचारिभिर्जीवैर्युतः सागरः बाहुभ्यां दुःखेन तरणीयो भवति। तत्र वर्तमाना मकरादयः कवलीकुर्युः, श्रान्तो वा तत्रैव निमज्जेत्। एवं यतिनाप्ययं भवसागरः दुःखेन तरणीयो भवति। संयमेऽनुद्यमवन्तं तं दोषाः कवलीकुर्युः प्रमत्तो वा तत्रैव निमज्जेत्।

**यतित्वं दुष्करमिति।** भावनाशक्तिरूपाभ्यां बाहुभ्यामयं भवसागरः तरणीयो भवति। शक्त्यनुसारिण्या भावनया संयमे यतनीयम्, न पुनः भावनानुसारिण्या शक्त्या। शक्त्यनुसारिण्या भावनया संयमे यतमानस्य दुष्करोऽपि यतिधर्मोऽभ्यासेन सुकरो भवति। शक्यस्यादरपूर्वकं पालनमशक्यस्य च दुःखमेतद्द्वयमेव यतिधर्म-सञ्जीवनोपाय इति॥१॥

**अपवर्गः फलं यस्य जन्ममृत्य्वादिवर्जितः।**
**परमानन्दरूपश्च दुष्करं तन्न चाद्भुतम्॥५.२॥**

**अपवर्ग** इति। सुगमः। यद्यपि यतिधर्मो दुरनुचरः तथापि उत्कृष्टफलस्य उत्कटोपायाधीनत्वेन तत्फलस्य च परमानन्दरूपत्वेन तस्यादरणीयत्वं दर्शयति—**अपवर्ग** इत्यादिना। अपवृज्यते मुच्यते संसारोऽनेनेति अपवर्गो मोक्षः। अनेन मुमुक्षुरेव यतिधर्मस्य यथार्थोऽधिकारीत्यावेदितम्।

**दुष्कर**मिति। श्रमं विना संसारिभिः धनमपि नावाप्यते ततः सहनं विना मुक्तिः कथमवाप्या? तुच्छस्यापि वैषयिकसुखस्य महदायाससाध्यत्वं पश्यतः परमानन्द-रूपापवर्गप्रापके यतिधर्मे कथं नु नाम कष्टं दृश्येतापि? कषायाणामधीनतैव तुच्छेऽपि वैषयिके सुखेऽनुरागं जनयति। स एव प्रतिबन्धको यतिधर्मपरिणामस्य समस्तस्य आन्तरदोषसमूहस्योत्पत्तिभूमिः आन्तरपरिग्रहरूपः। आन्तरपरिग्रहत्यागादेव दोष-त्यागो भवति। यतिधर्मः सुखत्यागाय वर्तते इति स्मरणशीलस्य पुनः न दोषः प्रभवतीति॥२॥

**भवस्वरूपविज्ञानात् तद्विरागाच्च तत्त्वतः।**
**अपवर्गानुरागाच्च स्यादेतन्नान्यथा क्वचित्॥५.३॥**

भवेति। सुगमः। त्रय उपाया यतिधर्मपालनस्य। तद्यथा- भवस्वरूपावगमो वैराग्यं संवेगश्च। उपाया हि उपेयप्राप्तेः पूर्वं भवन्ति। अतो यतिधर्मपरिणाम एतद्गुणत्रयावाप्तिपूर्वक एव भवतीत्यावेदितम्।

तत्र कषायेष्वेवानन्दभावः संसारः। स च मोहपरिणतिरूपः पौद्गलिकेषु भावेषु सुख-भ्रान्तिजन्यः। मोहोपहतचित्तो हि हिताहितविवेकविकलः भ्रान्त्या वस्तुतो दुःखसाधनेषु सुखमेव मन्यमानः प्रमाद्यति। प्रमत्तश्च सन् पौद्गलिकेषु भावेषु विमुह्यति। तत्र च सुखमलभमानः तप्तायःपायी पुरुष इव परां वेदनामनुभवति। एवं संसारे सुखार्थं यद् यत्करोति तद् दुःखफलमेव भवति। तदुक्तम्-

***दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः।***
***यां यां करोति चेष्टां, तया तया दुःखमादत्ते॥*** इति [प्रशमरतिः-४०]

अवगतभवस्वरूपश्च विषयेषु न स्वारस्येन प्रवर्तते। प्रथमं तावद् दूरत एव विषयान् विषकल्पान् वर्जयति। पूर्वकर्मानुभावेन अनिच्छया प्रवर्तमानश्च न तत्र मुह्यति। झटिति च पराङ्मुखो भवति। तदुक्तम्-

***सम्यग्दृष्टेर्महानुभावस्य तप्तलोहपदन्यासतुल्या पापे प्रवृत्तिः अस्वारसिकीति।***

[योगबिन्दुटीका]

मोह एव हि भ्रान्तिजनकः। अतो यतिना मोहनाशाय यतितव्यम्, न पुनर्दुःखनाशाय। यतो मोहे नष्टे दुःखं नष्टमेव। मोहनाशो हि अप्रमादेन भवति, अप्रमादः शास्त्राभ्यासेन सिद्ध्यति। शास्त्राभ्यासश्च गुर्वाज्ञापारतन्त्र्येण सम्पद्यते। गुर्वाज्ञामनुवर्तमानः जिनाज्ञानुवर्ती वर्तते। स्वेच्छाचारी च यतिरेव न भवति। सम्यग्गुर्वाराधनया मोहनीयस्यावरणमपक्षीयते। मोह-विकलस्य पुनः संसारे नैर्गुण्यदृष्टिरुपजायते। ततश्च स संसारवर्तीनि

सुखसाधनानि दुःखरूपाण्येवेति ज्ञात्वा न तत्राभिष्वजते। एवं चाधिगतभवनैर्गुण्यदृष्टेर्यथार्थं भवस्वरूपविज्ञानं सञ्जायते। विज्ञाते हि भवस्वरूपे भौतिकीनामिच्छानामुच्छेदो भवति। स एव वैराग्यमित्युच्यते। तदुक्तम्-

*भवस्वरूपविज्ञानाद् द्वेषान्नैर्गुण्यदृष्टिजात्।*
*तदिच्छोच्छेदरूपं द्राग् वैराग्यमुपजायते॥* [अध्यात्मसारः-५.१]

भवाद् भयम्, विषयेषु वितृष्णा, सुखसाधनेषु परो द्वेषश्च वैराग्यलक्षणानि। सोऽयं वैराग्यो भवोद्वेगादुत्पद्यते। सर्वाः सांसारिक्यः प्रवृत्तयो दुःखरूपाः सन्तीति मत्त्वा ततः स्पृहाया निवर्तनम् उद्वेगः। अवगतभवस्वरूपस्य विरक्तस्य च मोक्षे तद्धेतौ च अभिलाष उत्पद्यते, स संवेगः। एवं च गुणत्रयसम्पन्न एवात्र यतिधर्मस्याधिकारी भवतीति॥३॥

**इत्युक्तो यतिः, अधुनाऽस्य धर्ममनुवर्णयिष्यामः,**
**यतिधर्मो द्विविधः**
**सापेक्षयतिधर्मो निरपेक्षयतिधर्मश्चेति॥१॥** इति।

**इतीति।** अध्यायसङ्गतिदर्शकं सूत्रार्धं स्पष्टार्थकम्। **यतिधर्म इति।** यतेर्धर्मो विहितानुष्ठानजन्य गुणस्थानकपरिणामरूपः। धर्मे सापेक्षत्वं बाह्यालम्बन-प्रयोज्यत्वम्, तद्भिन्नत्वं निरपेक्षत्वम्। इतिशब्दः सूत्रसमाप्तावेवमग्रेऽपि सर्वत्र। तत्र निरपेक्षयतिधर्मो जिनकल्पिकानां सापेक्षयतिधर्मः स्थविरकल्पिकानाम्। तत्रात्मैकालम्बनो निरपेक्षयतिधर्मोऽनेकभवाभ्याससाध्यो न सापेक्षयतिधर्मं विहायावाप्तुं शक्य अतोऽत्रादौ सापेक्षयतिधर्मो विव्रियते। सापेक्षयतिधर्मस्य प्रतिबन्धिकाम् अविरतिं विजेतुं सुखेषु रतिः दुःखेष्वरतिश्च त्याज्या। एतदर्थं सुखस्य परिणामो विचारणीयः। यथा आपातरमणीयं खल्वेतद् विषयसुखं यदा न भविष्यति तदा मे का गतिर्भविष्यतीति। सुखानन्तरं दुःखमवश्यम्भावीति संसारनियमः। तदुक्तम्-

*चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ।* इति [ ]

एवं विचारयतस्तस्य सुखदुःखयो रत्यरतिरूपाविरतिर्न प्रभवति। तदभावाच्चास्य बुद्धिः स्थिरा भवति। सुखदुःखयोरवर्तमानस्यैव भावयतित्वमुक्तम्। तदुक्तम्-

*जो णवि वट्टइ रागे णवि दोसे दुण्ह मज्झयारेसु।*
*तस्स सामाइयं होइ इह केवलिभासियं॥* [आवश्यकनिर्युक्तिः-८०३]

यदुक्तमन्यैरपि—

*दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।*
*वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥*

[भगवद्गीता-२.५६] [अध्यात्मसारः १६-६५]

तथा च स्थितबुद्धिर्यतिः अध्यात्मभावनोदयात् लोकोत्तरं समता-भावमनुभवति। तदुक्तम्-

*आत्मप्रवृत्तावतिजागरूकः, परप्रवृत्तौ बधिरान्धमूकः।*
*सदा चिदानन्दपदोपयोगी, लोकोत्तरं साम्यमुपैति योगी॥* इति

[अध्यात्मोपनिषत्-४.१]॥१॥

निरपेक्षयतिधर्मस्य साधनभूतं सापेक्षयतिधर्मं विस्तरेण वर्णयितुमुपक्रमते—

**तत्र सापेक्षयतिधर्मः॥२॥** इति।

तत्रेत्यादिना। अधिकारसूत्रमिदं आ सप्ताशीतितमसूत्रमनुवर्तत इति॥२॥

तत्र तपःसंयमादिरूपस्य सर्वस्यापि यतिधर्मस्य गुर्वधीनत्वेन गुरुकुलवासमेव प्रथमं सूत्रत्रयेण प्रस्तौति— **गुर्वित्यादिना।**

**गुर्वन्तेवासिता॥३॥** इति।

**तद्भक्तिबहुमानौ॥४॥** इति।

**सदाज्ञाकरणम्॥५॥** इति।

**गुर्विति।** गृणाति उपदिशति तत्त्वमिति गुरुः, तस्य अन्ते समीपे वसतीति अन्तेवासी तस्य भावः गुर्वन्तेवासिता। आश्रितान् शिष्यादीन् स्वाच्छन्द्यान् मोचयन् गुरुर्गुरुः कथ्यते। शिष्यादीनां क्षतौ सत्यां हि स्मारणादिप्रकारेण निवारयन् गुरुरेव स्वात्महितायोपयुज्यते। तस्य गुरोरन्तेवासिनैव शिष्येण सदा भाव्यम्। अन्तेवासित्वं च तत्त्वतो गुर्वाज्ञानुवर्तित्वरूपम्, न गुरुसमीपवर्तित्वमात्रम्। दूरवर्त्यपि आज्ञामनुचरन् सुशिष्यः, समीपवर्त्यपि आज्ञामननुचरन् कुशिष्यः। गुरोरन्तेवासी शिष्यः स भवति यः कदापि गुरुमनापृच्छय न कुत्रापि प्रवर्तते, गुर्वज्ञातो यस्य विचारोऽपि नोदेति, यो गुरुचक्षुषैव जगत् पश्यति, गुरुकथनं सम्यक् शृणोति। एतादृशं शिष्यभावमाचरमश्वासमनुपालयन् शिष्यः महाफलमवाप्नोति। तस्य ज्ञानं वर्धते, दर्शनं निर्मलं भवति, चारित्रं शुद्ध्यति, यथाशक्ति त्यागतपसी जायेते। अतो गुरुकुलवासो महालाभकारी वर्तते इति ज्ञात्वा सदा सेव्यः॥३॥

**तद्भक्तीति।** तस्य गुरोः भक्तिः बाह्या प्रतिपत्तिः अश्रान्तवृत्त्या सेवेति यावत्। गुरोर्यदा यद् यदावश्यकं प्रतिभाति तस्य सम्पादनमिति भावः। बहुमानः आन्तरिकी प्रीतिः आराध्यत्वेन ज्ञानमिति यावत्। आराधना च स्वस्य भवनिस्तारणेच्छा। बहुमानपूर्विकां भक्तिं कुर्वाणः शिष्य एव यतिधर्मस्याधिकारी भवति नान्य इति भाव इति॥४॥

**सदेति।** दिवापि रात्रावपीत्यर्थः। आज्ञा नाम विधिनिषेधरूपं हिताहितयोः प्रवर्तकनिवर्तकं वचनम्। **करणमिति।** गुरोर्वचनं सानन्दं क्रियायाम् अवतारणीयम्। गुर्वाज्ञाबन्धने वर्तमानो यतिः मोहबन्धाद् विमुच्यत इति॥५॥

यतिधर्मपरिणामो हि क्रिययैव साध्यते। क्रिया च विहितप्रवृत्तिरूपा विधिनैवादृता परिणामाधायिका भवतीति विधेरेव माहात्म्यं प्रस्तौति— **विधीत्यादि।**

## विधिना प्रवृत्तिः॥६॥ इति।

**विधीति।** विधिः शास्त्रसन्दर्शित इतिकर्तव्यताबोधः। प्रवृत्तिश्च प्रतिलेखन-प्रमार्जना-भिक्षाग्रहणादिकोऽनवद्य आचारः। विध्यनुसारिण्याः प्रवृत्तेरभावे गुरुबहुमान-स्वाध्यायादिका गुणा अपि क्षीयन्ते। गुरुबहुमान-स्वाध्यायादी नामभावे च कुतो यतिधर्मपरिणामो? विधिपालनेच्छुकेन अविधिरप्यवश्यमेव ज्ञातव्यः परिहार्यश्च। शरीरसामर्थ्याभावे च योऽविधिर्भवति तस्य पश्चात्तापः कर्तव्यः प्रायश्चित्तं च करणीयम्। भवभयपूर्वकमविधिमाचरतः पापमपि पुण्यानुबन्धि बध्यते। तस्योदये च समाधिभाव अक्षुण्णो भवति। यतो हि विराधकभावस्य दुःखं विराधकभावस्य विनाशकमुक्तम्। विधे रागमविधेश्च च द्वेषमावहन् यतिरेव मार्गस्थो भवति। तदुक्तम्-

*विधिकथनं विधिरागो विधिमार्गस्थापनं विधीच्छूनाम्।*
*अविधिनिषेधश्चेति प्रवचनभक्तिः प्रसिद्धा नः॥* [अध्यात्मसारः-२०.३२]

विधिपक्षपातिन एव शास्त्राण्यपि फलन्ति, अन्यथा विधिपक्षपाताभावे अधीतशास्त्रस्यापि विपरिणामो भवतीति॥६॥

गुरुविषयमबहुमानभावं निवारयितुं पुनरपि गुर्वन्तेवासितामेव स्तौति— **आत्मेत्यादिना।**

## आत्मानुग्रहचिन्तनम्॥७॥ इति।

**आत्मेति।** पदार्थः स्पष्टः। भावार्थः पुनरयम्। निमित्तमासाद्य कषायाः बहुमानभावं घ्नन्ति। शिष्यादीनां क्षतौ सत्यां हि स्मारणादिप्रकारेण निवारयति गुरावपरिणतस्याबहुमानः स्यात्तदा आत्मानुग्रहचिन्तनेन स विफलीकरणीयः। स्मारणादिकुर्वाणस्य गुरोर्मनो मैत्रीप्रमोदभावाभ्यां परिप्लावितमेव भवति। शिष्योऽयं गुणसम्पन्नः स्यादथ च शासनस्य मालिन्यं मा भूदिति भावनया च कदाचित् ताडयेदपि तथापि चण्डरुद्राचार्यशिष्यवद् गुरोरुपकार एव स्मरणीयः। योग्यं शिष्यमेव गुरुः कदाचन तर्जयति। अयोग्यं शिष्यं प्रति तु मौनमेवालम्बते। अतो गुरोर्वचसि कदाप्यन्यथाभावो न कार्यः, अपि त्वेवं चिन्तनीयम्-

*धन्यस्योपरि निपतत्यहितसमाचरणधर्मनिर्वापी।*
*गुरुवदनमलयनिःसृतवचनरसश्चन्दनस्पर्शः॥* [प्रशमरतिः-७०] इति॥७॥

गुरुनिश्रायामेव सर्वा अप्याराधना शोभन्त इत्युक्तं प्राक्, गुरुनिश्रा च व्रतपरिणामरक्षार्थं भवतीति तामाह—

## व्रतपरिणामरक्षा॥८॥ इति।

**व्रतेति।** व्रताः प्राणातिपातविरमणादयः बाह्यक्रियारूपाः, तेषां परिणामः सन्ततोपयोगरूपः भावनासाध्यः तस्य रक्षा परिपालनम्। अयं भावः—प्राणात्ययेऽपि व्रतं रक्षणीयम्। व्रतरक्षा च मनःशुद्धौ

सत्यामेव शक्या कर्तुम्। यस्य मनोऽल्पीयस्यपि निमित्ते प्राप्तेऽस्वस्थं भवति तस्य यतिधर्मपालनमशक्यप्रायम्। अन्यच्च कस्यापि जीवस्य विराधना मा भूदित्येदर्थं यतिधर्मस्य सर्वा अपि क्रियाः सन्ति। जीवविराधनाभीतस्य यतेरेव आत्मपरिणामाः शुद्धा भवन्ति। हृदयस्थेन दयाभावेनैव चारित्रं स्थिरं भवति। अतः येन केनापि प्रकारेण मनो मलिनं यथा न स्यात्तथा प्रवर्तितव्यम्। तदुक्तम्-

*यत्किञ्चिच्चित्तमालिन्यकारणं मोक्षवारणम्।*
*मनोवाक्कायकर्मेह हेयं तत् स्वहितैषिणा।।* इति

[उपमितभवप्रपञ्चकथा प्रस्ताव-१]

ननु कोऽयं व्रतपरिणाम इति चेत्, शृणु, आस्रवान्निवृत्तिः संवरे प्रवृत्तिर्व्रतपरिणामः। यथा चिलातिपुत्रेण महात्मना करतलगतकरवालेन सन्मुखमुनिमुखश्रुतोपशमविवेकसंवरेतिशब्दत्रयेण तदर्थं विचारयता व्रतपरिणामो रक्षितः तथा व्रतपरिणामो रक्षणीय इति भावः।

ननु सर्वदा सत्यमेव ब्रुवतामस्माकं व्रतरक्षा भविष्यतीति चेद्, भ्रान्तोऽसि, सत्यम् आत्मना अस्वीकुर्वाणः अश्रद्दधानो वा वस्तुतः सत्यवाद्येव नास्ति, कथं तस्य व्रतरक्षा? एतदप्यवधेयम्—परमार्थभूतस्य सत्यस्योपदेशको यदि तस्य सत्यस्य स्वयं पालने उद्युक्तो नास्ति तस्यापि व्रतरक्षा न भवति। यः पुनः सत्यस्यावबोधार्थम्, स्वीकरणे, पालने च उत्सुकः तस्यैव व्रतरक्षा भवति। शास्त्रविहितविधि-निषेधजिज्ञासावतोऽपि व्रतरक्षा भवति। अनवगतस्यानाचरितस्य वा विधिरागा-विधिजिहासापूर्वकः पश्चात्तापोऽपि व्रतरक्षापरिणामाय कल्पत इति।।८।।

व्रतरक्षापरिणामार्थं क्रमशः पञ्चमहाव्रतविषयकनियमान् प्रदिदर्शयिषुः प्रथममहाव्रत-रक्षोपयोगिनम् आरम्भत्यागमुपदिशति—आरम्भेत्यादि।

## आरम्भत्यागः।।९।। इति।

**आरम्भेति।** आरम्भः सावद्यानुष्ठानम्, तस्य त्यागः। यत्राल्पीयस्या अपि जीवहिंसायाः सम्भवः सा क्रिया आरम्भः। स यथा न भवति तदुत्तेजनमपि च यथा न स्यात् तथा प्रवर्तितव्यम्। शयनासन-भोजन-पान-स्थान-निष्क्रमण-चङ्क्रमणादिकासु सर्वास्वपि क्रियासु आरम्भः सम्भवति। एताः क्रियाः कुर्वाणाः सर्वेऽपि संसारिणो विरतेरभावात् कर्मणा बध्यन्ते, सर्वसावद्ययोगविरता यतयः पुनर्मुच्यन्ते। जीवरक्षाया उपयोगः प्रमार्जना च तत्र प्रधानहेतू। तदर्थमेव शास्त्रारम्भः। जीवरक्षायां प्रमार्जनायां चोपयुक्तस्य अनाभोगादिना जायमाना हिंसापि कर्मबन्धाय न भवति। तद्रहितस्य तु हिंसाभावेऽपि कर्मबन्धो भवति। आरम्भत्यागं विना क्रिया निर्जरारूपा न भवतीति यावदिति।।९।।

आरम्भत्यागमेव व्यक्तिशः प्रदर्शयति सूत्रत्रयेण—

**पृथिव्याद्यसङ्घट्टनम्॥१०॥** इति।

**त्रिधेर्याशुद्धिः॥११॥** इति।

**भिक्षाभोजनम्॥१२॥** इति।

**पृथिव्ये**त्यादि। पृथिव्यप्तेजोवायुवनस्पतित्रसकायानां सचित्तानां सङ्घट्टनं स्पर्शः। स च सावधानेन यतिना परिहार्यः। यतः सर्वासु क्रियासु जीवरक्षापरिणामः प्रधानो भवति। तदर्थं चेर्यासमितिरवश्यमेषणीया। ईरणमीर्या गमनमिति यावत्। सा चोर्ध्वाधस्तिर्यग्दिग्भेदेन त्रिधा पालिता शुद्धा भवति। ग्लानाद्यागाढकारणे च क्वचित्तत्पालनासम्भवेऽपि कारणे निष्ठिते पुनः ईर्याशुद्धौ यतनीयम्। यतोऽपवाद उत्सर्गमार्गपोषणार्थं भवति। अतोऽपवादस्थानासेवनानन्तरं मूलमार्गे पुनरागमनीयम्। गरीयस्या विराधनाया आत्मनो रक्षार्थमल्पीयसी विराधना निषेव्यते तथापि सा विराधनैवेति ततोऽप्यात्मा रक्षणीय एवेति लक्ष्यं न विस्मरणीयम्।

ननु परोपकारार्थमपवादमाचरमाणो यतिः शुद्धो भविष्यतीति चेत्, न, स्वोपकारं विस्मृत्य क्रियमाणस्य परोपकारस्य भगवता निषिद्धत्वात्।

तदेवमीर्यासमित्यादौ उपयोगशुद्धिं प्रतिपालयन् यतिः अल्पेनैव कालेन प्रतिसमयम् असङ्ख्यातगुणां निर्जरां करोतीत्यादिकं भगवदुक्तं विचिन्त्य सम्यगीर्याशुद्धौ यतनीयम्। सम्यगीर्याशुद्ध्यादिरूपस्य यतिधर्मस्योपग्रहार्थं भोजनमप्यावश्यकमिति तद्विधिमाह—**भिक्षे**ति। स्पष्टम्। भावार्थः पुनरयम्—मनोवचःकायैः त्रिविधमारम्भत्यागी एव भिक्षाभोजनस्याधिकारी तस्यैव भिक्षा शोभते। अन्यथा याच्ञापूर्वकं भोजनं तत्सदृशं दुःखं नास्तीति कृत्वा लोकेऽपि तिरस्कृतम्। सा च भिक्षा त्रिविधा प्रोक्ता। सर्वसम्पत्करी पौरुषघ्नी वृत्तिश्च। सर्वप्रकारेण सम्पत्करोतीति सर्वसम्पत्करी भिक्षा प्रथमा। सम्पच्चात्र संयमपरिणामरूपाधिकृता। सदा ध्यानोपयुक्तस्य, शुभसङ्कल्पस्य, स्थिरमतेः, आरम्भत्यागिनः मुक्तिमार्गसाधनसावधानस्य च सा भवति। अत्र ध्यानविषये बहु वक्तव्यं तत्तु द्व्यशीतितमे सूत्रे वक्ष्यते। पौरुषं हन्तीति पौरुषघ्नी, धर्मपुरुषार्थं बाधत इति यावत्। चारित्राचारेऽनुद्यतस्यानादरवतश्च, गुर्वाज्ञायामनवस्थितस्य, उदर-भरणार्थं रसनालौलुप्यपोषणार्थं च प्रवृत्तस्य यतेर्भिक्षा पौरुषघ्नी प्रकीर्तिता। तृतीया वृत्तिभिक्षा धनहीनानाम्, शक्तिविकलानां याचकानां भवति। ये अनुकम्पायाः पात्रीभूय याचित्वा जीवनयापनं कुर्वन्ति तेषामेषा भवति। अत्र सर्वसम्पत्करी-भिक्षाप्रस्तावाद् भिक्षाविषये केचनोपयोगिनो नियमा उच्यन्ते।

भिक्षायामाहारप्राप्तौ संयमवृद्धिरप्राप्तौ च तपोवृद्धिर्भविष्यतीति भाव आस्थेयः।

पिण्डनिर्युक्त्यादेः शास्त्राद् उद्गमोत्पादनादिदोषान् ज्ञात्वा यतिना भिक्षा-नयनार्थं गन्तव्यम्।

सङ्घाटकेन सहैव भिक्षार्थं निर्गन्तव्यम्, नैकाकिना।

यथारुचि भिक्षा न ग्राह्या, अपि तु आहारमासाद्य विशिष्टं संयम-योगमाराधयिष्यामीति प्रणिधाय भिक्षार्थं निर्गन्तव्यम्।

भिक्षार्थं गतेन यतिना बाल-वृद्ध-ग्लान-तपस्व्यादीनां चिन्तापरेण भाव्यम्।

यथा भ्रमरो बहुभ्यः पुष्पेभ्यः स्वल्पमेव रसमापिबति तथा यतिनापि बहुषु गृहेषु भ्रमता स्वल्प एवाहार एषणीयः। तदुक्तम्—

*जहा दुमस्स पुप्फेसु भमरो आवीयइ रसं।*
*न य पुप्फं किलामेइ सो अ पीणेइ अप्पयं॥*
*एमेए समणा मुत्ता जे लोए संति साहुणो।*
*विहंगमा व पुप्फेसु दाणभत्तेसणे रया॥*
*वयं च वित्तिं लब्भामो ण य कोइ उवहम्मइ।*
*अहागडेसु रीयंते पुप्फेसु भमरा जहा॥*
*महुगारसमा बुद्धा जे भवंति अणिस्सिया।*
*नाणापिंडरया दंता तेण वुच्चंति साहुणो॥* [दशवैकालिकसूत्रम् अध्य. १.२-५]

गुरुमापृच्छयैव निर्गन्तव्यम् भिक्षायां चानीतानि सर्वाण्येव द्रव्याणि गुरोर्दर्शनीयानीति भगवदुपदिष्टो नियमः। एतत्तु ग्रन्थकारः स्वयमेव वक्ष्यति त्रयस्त्रिंशत्तमादिषु सूत्रेषु।

उत्सर्गेण यतीनां विकृतीनां वनस्पतीनां खादिम-स्वादिमानां च ग्रहणं न कल्पते। कारणे सति विकृतीनां वनस्पतीनामावश्यकानुपानादीनां च ग्रहणार्थं पूर्वमेव गुरवोऽनुज्ञापितव्याः [गुरोरनुज्ञा ग्राह्या]। गुरूक्तप्रमाणमेव विकृत्यादि ग्राह्यम्, नाधिकम्। तदुक्तं कल्पसूत्रे—

***वासावासं पज्जोसविए भिक्खु य इच्छिज्जा अन्नयरिं विगइं आहारित्तए नो से कप्पइ अणापुच्छित्ता आयरियं वा जाव गणावच्छेययं वा जं वा पुरओ काउं विहरइ, कप्पइ से आपुच्छित्ता णं तं चेव—इच्छामि णं भंते! तुब्भेहिं अब्भणुन्नाए समाणे अन्नयरिं विगइं आहारित्तए, तं एवइयं वा एवइखुत्तो वा, ते य से वियरेज्जा एवं से कप्पइ अन्नयरिं विगइं आहारित्तए, ते य से नो वियरेज्जा एवं से नो कप्पइ अन्नयरिं विगइं आहारित्तए, से किमाहु भंते! ? आयरिया पच्चवायं जाणंति॥***

[कल्पसूत्र-२७६]

सहवर्तिनां सर्वेषां साधूनां भक्तिं कृत्वाहारार्थमुपवेष्टव्यम्।

यतिना भिक्षा यथा सर्वसम्पत्करी स्यात्तथा कार्यम्। गुणरहितस्य यतेर्भिक्षा पौरुषघ्नी प्रकीर्तिता। यतिधर्मस्य विराधकः प्रतिदिनं मनोज्ञाहारादिषु सक्तः भिक्षादातॄणामृणी भवति। आगामिनि च भवे तेन तदृणं भृगुकच्छपुरीय-महिषीभूयोत्तारणीयं भविष्यति। धर्म्यमाहारं भुञ्जानस्य पुनश्च धर्ममकुर्वतो बहुधा दुर्गतिर्भवतीति यतिधर्मे तथा यतनीयं यथा भिक्षादातापि धर्मं लभेतेति॥१२॥

भिक्षार्थं गतस्य यतेः बाह्यै रागजनकैः स्त्र्यादिभिः पदार्थैः सहेन्द्रियाणां सम्पर्के सति संयमविराधना-सम्भवोऽतस्तद्वारणायाह—

## आघाताद्यदृष्टिः॥१३॥ इति।

**आघातेति।** आ समन्तात् संयमं हन्तीति आघातो मनोज्ञविजातीयरूपादिः। तेष्वदृष्टिः तददर्शनमिति। अयं भावः—यतिना सदाधोमुखेनेर्यासमित्युपयोगपूर्वं विहरणीयम्। इतस्ततो दृष्टिर्न देया। भिक्षाचर्यायाम् आहारदानं प्रायः गृहिणीभिः क्रियते। तासां रूपादिदर्शनेन यतेर्मोहोत्पत्तिः स्यात्। मनोज्ञविजातीयरूपं च संयमस्याघातकृद् भवतीति तद्दिदृक्षापि दोषावहा भवति। आदिपदेन सङ्क्लेशजनकस्यान्यस्यापि रागादेः परिग्रहः। येन दृष्टेन रागो द्वेषो दुर्भावो वाभिवर्धते तद्यतिना न द्रष्टव्यम्। जीवहिंसायाः स्थानेषु द्यूतादिप्रमादस्थानेषु च सकृदपि दृष्टिर्न देया। एवमेव चित्रादिष्वपि दृष्टिर्न देया। तेषां सञ्ज्ञापोषकत्वेन सङ्क्लेशजनकत्वश्रुतेर्दूरतः परिहार एव श्रेयः। तदुक्तम्—

***संकिलेसकरं ठाणं दूरओ परिवज्जए॥*** [दशवैकालिकसूत्रम्-५.१६]

एवमेव परदोषदर्शनस्यापि सङ्क्लेशजनकत्वेन आघातरूपत्वात् परिहारः कार्यः। तत्त्वबोध आत्मनः स्वभावः, जगद्बोधस्तु विभाव इति मत्वा यतिना स्वयमेव स्वीया दृष्टिः अकुशलस्थानेभ्यो निवार्य कुशलस्थानेषु निवेशनीयेति॥१३॥

दर्शनवद् आघातादीनां श्रवणस्यापि समानदोषावहत्वप्रतिपादनायाह—

## तत्कथाश्रवणम्॥१४॥ इति।

**तत्कथेति।** सूत्रार्थः स्पष्टः। भावार्थः पुनरयम्। यतिर्जगतो गुरुर्वर्तते। तेन सर्वदा स्वप्रवृत्तावेव लीनेन भाव्यम्। अन्ये किं कुर्वन्ति, समीपे किं प्रवर्तमानमस्तीत्यनयापारमार्थिकया चिन्तया मुक्तेन भाव्यम्। दोषभीरुः गुणेषु च लब्धलक्ष्यो यतिः परप्रवृतौ कदापि न रमते। यतिर्यस्यां वसतौ निवसति तत्र यदि गृहस्थानामागमनं नास्ति तदानन्देन स्वाध्यायं कुर्यात्। यदि कश्चिद् गृहस्थ आगच्छति तदा धर्म्यां कथां विदध्यात्। धर्म्यां विहायान्यां कथां प्रयत्नतो वर्जयेत्। धर्मजिज्ञासया तत्त्वजिज्ञासया वा रहितो गृहस्थोऽरिरिव यतिभावस्य मन्तव्यः। गृहस्थैः कृतां वार्तामपि विवेकबुद्ध्या श्रोतव्या, अन्यथा यतिभावस्य हानिर्भविष्यति। भगवतां श्रीमदुमास्वातीनामिदं वचनं सदा मनसि निधेयम्—

***तच्चिन्त्यं तत्कार्यं तद्भाष्यं भवति सर्वथा यतिना।***
***नात्मपरोभयबाधकमिहपरलोके च सर्वाद्धम्॥*** [प्रशमरतिः-१४७] इति॥१४॥

रागद्वेषाकुले चित्त एव आघातादीनां श्रवणदर्शनाद्याकर्षणं सम्भवतीति रागद्वेषपरिहारोपदेशमाह—

## अरक्तद्विष्टता॥१५॥ इति।

**अरक्तेति।** रञ्जनं रागः, रक्तत्वं रञ्जनक्रिया तद्वान् रक्तः, न रक्तोऽरक्तः तस्य भावोऽरक्तता। एवं द्वेषनं द्वेषः तद्वान् द्विष्टः, न द्विष्टोऽद्विष्टः तस्य भावोऽद्विष्टता। नञोऽल्पार्थत्वात् यतिना रागद्वेषहानौ यतितव्यमिति तात्पर्यम्।

एष सूत्रार्थः। भावार्थः पुनरयम्—इह अविरतेः कषायाणां च ताण्डवमाभ्यन्तरः संसार उच्यते। तस्मान्मुक्तो यतिः सर्वदा शान्तो विरक्तश्च भवति। तत्र पापे प्रवर्तित्सा अविरतिः, कषायाश्च पापप्रवृत्ति-सम्पादकाः। आनुकूल्यात्मिकायां पापप्रवृत्तौ आनन्दानुभवो रागः, प्रातिकूल्यात्मिकायां पापप्रवृत्तौ आनन्दानुभवो द्वेषः। अविरतेः हेतुभूतायाः सुखेषु तत्साधनेषु च रागः सञ्जायते, दुःखेषु तत्साधनेषु च द्वेष उत्पद्यते। धर्मी सुखेषु तत्साधनेषु च रक्तो न भवति, अपि तु धर्मे तत्साधने च रक्तो भवति। एवं दुःखेषु तत्साधनेषु च द्विष्टो न भवति, अपि तु पापे तत्साधनेषु च द्विष्टो भवति। पापहेतुत्वादविरतिः कषायाश्च पापरूपाः कथ्यन्ते। अविरतेः पापरूपताम् अवगच्छन् यतिः षड्जीवनिकायान् रक्षति। कषाया भूतसदृशा वर्तन्ते। य उपयोक्तुं जानाति तं प्रति साधका भवन्ति, अन्यं प्रति मारका भवन्तीति। अविरतिकषायावेव च रागद्वेषवर्धनौ। अतो यतिना रागद्वेषजयार्थं सन्ततं प्रयासः कार्यः। वीतरागदशोपलब्धये रागद्वेषौ प्रतिबन्धकौ भवतः इति जानानो यतिः तज्जयार्थं दत्तदृष्टिः स्यात्। चित्ते प्रवर्तमानयोरपि रागद्वेषयोर्विषये गौतमस्वामिवद् विपरीतभावं विदध्यात्। यथाद्यापि मम कैवल्यं कस्मान्नोत्पद्यते? इति॥१५॥

अधुना भावयतिधर्मस्याङ्गभूतान् शेषगुणानेव क्रमशो दर्शयति। तत्रापि रागद्वेषयोर्निग्रहः वैयावृत्त्येन सुकरो भवतीति तदाह—

### ग्लानादिप्रतिपत्तिः॥१६॥ इति।

**ग्लानादीति।** ग्लानो रोगेण शरीरमनोभ्यां विकलः। आदिपदेन बालवृद्धतपस्विज्ञानिशैक्षादीनां परिग्रहः। तेषां प्रतिपत्तिः प्रतिचरणं वैयावृत्त्यमिति यावत्। एतेषां वैयावृत्त्यं तथा कर्तव्यं यथा स ग्लानादिः स्वजनादिकं न स्मरेत्। भगवता वैयावृत्त्यमप्रतिपाती गुणः कथितः, उक्तमपि स्वयम्—

***जो गिलाणं पडियरइ सो मां पडियरइ*** [ ] इति।

स्वाध्यायध्यानादियोगेभ्योऽपि वैयावृत्त्यस्यावसरः बलवत्तरः। वैयावृत्त्यमुपेक्ष्य स्वाध्यायादिकं कुर्वाणो यतिर्विराधक उक्तः शास्त्रेषु। यथा यथा यतेः शास्त्राभ्यासो वर्धते तथा तथा वैयावृत्त्ये रतिरपि वर्धते। वैयावृत्त्यकारको यतिर्महत्या निर्जराया भाजनं भवतीति॥१६॥

### परोद्वेगाहेतुता॥१७॥ इति।

**परोद्वेगेति।** परः स्वस्मादन्यः, उद्वेगोऽप्रीतिः, न हेतुरहेतुः, परोद्वेगस्याहेतुः परोद्वेगाहेतुः तद्भावः तत्ता। जीवहिंसाया आत्मानं रक्षन् यतिः कथं नु नाम वचनेन व्यवहारेण वार्तयापि वा सहवर्तिनां यतीनाम् उद्वेगजनकं वा निर्वेदजनकं वा कोपजनकं वा वर्तनं समाचरेत्? सति हि स्वार्थे तद्भङ्गे सति उद्वेगादिः सम्भवति। स्वार्थाभावे तु वैमनस्यम् अशक्यप्रायम् एव। ननु मनसः परोद्वेगाहेतुतानुकूल्य-सम्पादनार्थं किं करणीयम्? इति चेत्, शृणु, तथा मनोऽभ्यसनीयं यथा अन्यनिमित्तेन मनसि असमाधिभावो नोत्पद्येत। सति हि स्वार्थे वैमनस्यम् उपजायते तच्चासमाधिं जनयति। मनसि परनिमित्तकासमाधिभावाभावे परोद्वेगहेतुताया अपि अभावः सुकरो

भवति। शिथिलं मनः असमाधिभावस्य भूमिर्वर्तते। शिथिलमना यतिः स्वपरोभयस्य पीडाजनको भवति। मन एव यतिधर्मस्याधारभूतमित्युक्तं महर्षिभिः। स्वस्थे मनस्येव यतिधर्मस्याराधनं सुकरं भवति। अस्वस्थे पुनस्तस्मिन् यतिधर्मस्याराधनं दुष्करमिति ज्ञेयम्। अन्यं नोद्वेजयिष्यामीति कृतसङ्कल्पस्य यतेः यतिधर्मः कल्पवृक्षसदृशो भवतीति॥१७॥

ननु यदि सर्वथैव परोद्वेगः परिहार्यः तदानुशासनं कथं प्रवर्तेत? वारणादिषु कृतेषु परोद्वेगः स्यादेव इत्याशङ्कायामाह—

**भावतः प्रयत्नः॥१८॥** इति।

**भावत इति।** सूत्रार्थः स्पष्टः। भावार्थः पुनरयम्। शिष्यादीनां महति अपराधे सञ्जाते सौम्यादिवचोभिः सारणादिभिश्चाबुध्यमानेषु तेषु शरीरेण वाचा चानुशासनमवश्यं कर्तव्यं किन्तु मनसि करुणैव करणीया, न द्वेषः, यतो द्वेषे कृते यतिधर्मो विनश्यति। शुद्धेन मनसा सत्यं वाच्यम्। रागद्वेषाभ्यामुक्तं सत्यमप्यसत्यं भवतीति भगवदुपदेशः। तदुक्तम्—

***तिव्वरागा य जा भासा तिव्वदोसा तहेव य।***
***मुसावायस्स वेरमणे एस वुत्ते अइक्कमे॥*** [पाक्षिकसूत्रम्]

मनसि यथा सङ्क्लेशो न स्याद् योग्यं च कार्यं नावरुद्ध्येत इति विवेकवान् यतिः गीतार्थसदृशो भवतीति॥१८॥

ननु भावतः प्रयत्नः सर्वथाशक्यक्रियः, यतो भावस्तूत्कृष्टोऽपि मासक्षपणादि-विषयो भवति, तस्य च प्रयत्नासाध्यत्वात् नैराश्यं स्यात्, तच्च विरुद्धं यतिधर्मस्येति कथमिदं सङ्गच्छत इत्याशङ्कायामाह—

**अशक्ये परिहारः॥१९॥** इति।

**अशक्य इति।** सूत्रार्थः स्पष्टः। भावार्थः पुनरयम्—स्वल्पे पतनधर्मे चायुषि अधिकतमो धर्म आराधनीय इति भावनावान् यतिः सदाप्रमत्तो भवति। नाप्रमत्तस्य किञ्चिदसाध्यम्। तथापि तत्साधकशक्तिसामग्र्याद्यभावेन सर्वे सर्वान् योगान् आराधयितुं न शक्नुवन्ति। सत्यपि भावे प्रयत्नासाध्या योगा नाराधनीयाः। यैः कृतैः आवश्यक-स्वाध्यायगुरुसेवाद्या नित्यक्रियाः सीदन्ति ते योगा नाराधनीयाः। यथाशक्ति सर्वे योगा आराधनीयाः। शक्तेरुपेक्षा न कर्तव्या, नापि शक्तेरतिक्रमः कर्तव्य इति॥१९॥

अधुना द्वितीयमहाव्रतरक्षोपयोगिनम् उपदेशमाह—

**अस्थानाभाषणम्॥२०॥** इति।

**अस्थानेति।** अयुक्तं स्थानमस्थानम्, तत्र न भाषणमभाषणमिति सूत्रार्थः। भाषासमितिर्यतिधर्मस्य प्रधानमङ्गम्। यतिर्विना प्रयोजनं न भाषते। मौनमाश्रित्य स्वाध्याय एव निरत आस्ते। अवसरानुरूपं

स्थानानुरूपं योग्यतानुरूपं च भाषते। अवसराननुरूपभाषणं हि अप्रस्तुतं भवति। स्थानाननुरूपभाषणं हि प्रभावहीनं भवतीति। योग्यताननुरूपभाषणं हि व्यर्थमेव भवति। प्रयोजने सति किं वक्तव्यम्, कदा वक्तव्यम्, कथं वक्तव्यम्, कस्य वक्तव्यमिति यतिः सम्यग् जानीयात्। प्रयोजने सति मौनमप्यावश्यकमित्यपि सम्यग् विजानीयाद् इति॥२०॥

## **स्खलितप्रतिपत्तिः॥२१॥** इति।

**स्खलितेति।** स्खलितं प्रमादाद् दोषाद्यासेवनम्। तस्य प्रतिपत्तिः स्वीकारो गुर्वादिसमक्षमिति। छद्मस्थतावशेन यतेरपि स्खलनं सम्भवति। स्खलने सति तन्निगूहनं न कर्तव्यम्। गुर्वादिसमक्षं तस्य निवेदनं कर्तव्यम्। अन्यश्चेदपराधपदं स्मारयति तदा स बहुमन्तव्यः। अन्याज्ञातोऽपि दोषः गुरोर्निवेद्यः। पापालोचनरूपां प्रतिपत्तिं विना पापं न क्षीयते। अतः प्रतिपक्षं प्रतिचातुर्मासीं प्रतिवर्षं च आलोचनया पापशुद्धिः कर्तव्या। पापस्य गूहनं निह्नवश्च महतेऽनर्थाय भवति।

ननु गूहननिह्नवयोः कः प्रतिविशेषः? इति चेत्, शृणु, कृतेषु बहुष्वपि पापेषु माययाल्पीयसामेव प्रतिपत्तिर्गूहनम्, निह्नवः पुनः सर्वथैवास्वीकार इति। अयं च महान् दोषः। पापं कृत्वा छलेनात्मरक्षणं यतिधर्मस्य बाधकमिति ज्ञेयम् इति॥२१॥

## **पारुष्यपरित्यागः॥२२॥** इति।

**पारुष्येति।** पारुष्यं वाचि क्रोधजन्या कर्कशता कटुता कठोरता च। एतासां परित्यागः क्रोधोदयनिरोधेन विफलीकरणम्। यतिर्जगतो गुरुर्वर्तते। तस्य वाचि करुणैव शोभते, न पारुष्यम्। अनुशासनाद्यवसरे कठोरशब्दानां प्रयोगे कर्तव्येऽपि कषायावेशाद् यद्वा तद्वा न प्रलपति। वाचि पारुष्याभावे च धर्मप्रभावनापि भवति, नच कोऽपि धर्माद् भ्रंशति। यदुक्तं टीकाकृता—

> ***सिद्धेर्विश्वासिता मूलं यद्यूथपतयो गजाः।***
> ***सिंहो मृगाधिपत्येऽपि न मृगैरनुगम्यते॥*** इति॥२२॥

## **सर्वत्रापिशुनता॥२३॥** इति।

**सर्वत्रेति।** हीनत्वापादनबुद्ध्यान्यसमक्षमन्यदोषप्रकाशनं पिशुनता, तदभावोऽपिशुनता। सर्वत्र गुणवतामगुणवतामपि। एतेन दोषवतामवमानना-भिप्रायेण दोषोद्भावनमपि पिशुनतैवेति ज्ञेयम्। गृहस्थैरपि परिहार्येष्वष्टादशसु पापस्थानकेषु चतुर्दशं पैशुन्यं यतिना दूरत एव वर्जनीयम्। यतिना स्वीया एव दोषा द्रष्टव्या न परकीयाः। स्वदोषदर्शनाद् यतिः सावधानो भवति। स्वदोषहानौ प्रयतमानस्य यतेः परदोषदर्शनकृतेऽवकाशो नास्ति। विपरीतकर्मोदयादात्मा दोषेण लिप्यते। नन्दिषेणार्द्रककुमाराषाढाभूतिसदृशा गुणवन्तोऽपि कर्मोदयवशाद् दोषैरलिप्यन्त। कर्मोदयं दृष्ट्वा यतिना सावधानेन भाव्यम्, तत्स्थाने परदोषप्रकटनं यतेर्न

शोभास्पदम्। स्वाध्यायसूत्रार्थचिन्तनादिषु अनुपयुक्त आत्मा नवनवैर्दोषैर्लिप्यतेऽतः परदोषप्रकटनं विहाय स्वीय आत्मा दोषै रक्षणीयः। इदं तु ज्ञेयम्—हीनत्वापादनबुद्ध्यभावे सत्यासत्य-निर्णयार्थमुपकारबुद्ध्या वाधिकारिणा क्रियमाणं परदोषप्रकटनमदुष्टं वर्तत इति॥२३॥

## **विकथावर्जनम्॥२४॥** इति।

**विकथेति।** विपरीता विरुद्धा वा कथा विकथा रागद्वेषाभिवर्धका-कुशलाशयजनकत्वात् पापकथेति यावत्। सा स्त्रीभक्तदेशराजकथाभेदात् चतुर्विधा। विकथाभिः मनस्यकुशला विकारा उपजायन्ते तैश्च शुद्धस्फटिकसङ्काश आत्मा मलिनः कलङ्कितश्च भवति। स्वपरभावविमुक्तस्य यतेः शास्त्राभ्यासं विहायान्येन किं प्रयोजनम्? इति॥२४॥

## **उपयोगप्रधानता॥२५॥** इति।

**उपयोगेति।** उप सामीप्ये, सामीप्येन योग उपयोगः। उपयोग एव प्रधानो यस्य स उपयोगप्रधानः तद्भाव उपयोगप्रधानता। अयं भावः—सर्वापि यतिक्रिया भावपूजास्वरूपा वर्तते। उपयोगादेव च भावोत्पत्तिर्भवति। उपयोगरहिता क्रिया द्रव्यक्रिया भवति। सर्वाण्येवानुष्ठानानि स्थिरोपयोगपूर्वकमनुष्ठेयानि। क्रियाणां सूत्राणां चालम्बनेनात्मा शुद्धेषु भावेषु प्रतिष्ठाप्यः। क्रियाभिः सूत्रैश्च विना शुद्धो भावोऽसम्भवीत्यतः क्रियाः सूत्राणि चावश्यकानि। यदि क्रियाभिः सूत्रैश्च सह शुद्धो भावो नानुसन्धीयते तदा तानि द्रव्यानुष्ठानानि भवन्ति। द्रव्यानुष्ठानं मोक्षं प्रति निष्फलं भवति। अत एवानन्तशो द्रव्यलिङ्गग्रहणेऽपि न निस्तारः। मम क्रिया मोक्षसाधिका भवन्तु इति भावना उपयोगप्रधानतोच्यते। उपयोगं विना क्रियमाणा क्रिया आत्मनो हिताय न भवति। मोक्षस्योपयोग आत्मनो लाभाय भवतीति॥२५॥

## **निश्चितहितोक्तिः॥२६॥** इति।

**निश्चितेति**। पूर्वोक्तं [द्वाविंशतितमे सूत्रे] वचनविषयं पुनराह। निश्चिता संशयविपर्ययानध्यवसायरहिता चासौ हिता चेति निश्चितहिता, सा चासौ उक्तिर्वचनव्यापारश्च निश्चितहितोक्तिः। अयं भावः—आहारं विना शरीरं न निर्वहति तथा वचनं विना व्यवहारोऽपि न निर्वहति। अतो यतिः सत्यामावश्यकतायां संशयविपर्ययानध्यवसायरहितमेव ब्रूयात्। परस्परविरुद्धार्थद्वयविषयकं ज्ञानं संशयः। यथा रज्जुर्वा सर्पो वायमिति। संशये सति तत्त्वं न ज्ञायते। स्पष्टताया अभावे तत्त्वप्ररूपणा विभ्रममेव जनयेत्। यतः प्ररूपणायां सन्देहस्यावकाशो न भवति।

अतस्मिँस्तद्वत्ताज्ञानं विपर्ययः। भगवदुक्तार्थविपरीतमिति यावत्। ***तमेव सच्चं निस्संकं जं जिणेहिं पवेइयं*** इति श्रद्धावतो यतेः सर्वा अपि विचारा भगवदुक्त्यनुसारिण एव भवन्ति। भगवदुक्तार्थविपरीतप्ररूपको यतिः भगवद्द्रोहित्वादनन्तकालं संसारे परिभ्रमति।

अस्पष्टो बोधोऽनध्यवसायः। अभ्यासं विना बोधः स्पष्टो न भवति। पुरुषार्थं विनाभ्यासो न भवति। अतोऽभ्यास एवाधिकः पुरुषार्थो विधेयः। सम्यगवगतस्यैव च प्ररूपणा कार्या। अनवगते ह्यर्थे मौनमास्थेयम्। यथार्थावगतं हि तत्त्वं स्वपरोपकाराय भवति। अन्यथावगतं पुनः स्वपरापकाराय भवतीति॥२६॥

## प्रतिपन्नानुपेक्षा॥२७॥ इति।

**प्रतिपन्नेति।** प्रतिपन्नं स्वीकृतम्, तस्यानुपेक्षेति उपेक्षा न कर्तव्या इति। अयं भावः—यतिना आराधनाया अङ्गानि सम्यक् परिपालनीयानि, तत्र प्रमादो न विधेयः। आलस्यमुपेक्षा च महान्तौ दोषौ। तयोर्वशवर्ती जीवोऽवसराच्च्युतो भवतीति॥२७॥

## असत्प्रलापाश्रुतिः॥२८॥ इति।

**असदिति।** सन् सज्जनः, असन् दुर्जनः तस्य प्रलापः असद्भाषणम्, तस्याश्रुतिः। अयं भावः—यतिसमीपमागच्छन्तः सर्वे पुरुषाः सज्जनाः न भवन्ति, केचन दुर्जना अपि भवन्ति। यतिना तौ विवेक्तव्यौ। दुर्जनानां धर्मबाधाकारिणी दुर्भाषितानि प्रथमतो न श्रोतव्यानि। कदाचित् कर्णपटलगोचराणि भवेयुः तदापि मनसि न धारणीयानि। दुर्भाषितानि श्रवणमात्रेण शुभचित्तं हरन्तीत्यतो दूरतो वर्जनीयानीति॥२८॥

## अभिनिवेशत्यागः॥२९॥ इति।

**अभिनिवेशेति।** अभिनिवेशोऽसदाग्रहः तस्य त्यागः। अयं भावः—प्रज्ञापनीयता यतेर्मूलगुणः प्रोक्तः शास्त्रेषु। वक्रा जडाश्च पुरुषाः अभिनिवेशात् सत्यं नावगच्छन्ति। असत्यं परिजिहीर्षुर्हि सत्यस्य स्वीकारार्थमुत्सहते। अभिनिविष्टश्च असदाग्रहात् सत्यमेव न शूश्रुषति, श्रुतमपि न स्वीकरोति। सर्वेऽपि निह्नवा बुद्धिशालिनोऽपि असदाग्रहादेव शासनस्य हानौ निमित्तीभूय दुर्गतिं गतवन्तः। अतः असदाग्रहं विहाय सत्यमवश्यं श्रोतव्यम्। सम्यक्सत्यमनवगम्य कस्यापि मुक्तिर्न भवति न भाविनी च इति॥२९॥

अधुना तृतीयमहाव्रतरक्षोपायम् उपदेष्टुकामो ग्रहणैषणाविषयं विशेषं दशभिः सूत्रैराह—

## अनुचिताग्रहणम्॥३०॥ इति।

**अनुचितेति।** नोचितमनुचितं यतिधर्मस्य तस्याग्रहणम्। यतिधर्मस्यानुचितानि साधनानि न गृह्णीयाद् धारयेद् वा। आहार-वसति-वस्त्रपात्रेषु योग्यायोग्यविवेकपुरस्सरं प्रवर्तेत। आवश्यकमाहाराद्यर्थं गुरुमेव निवेदयेत्, तदर्थं गृहस्थस्य सम्पर्कं न विदधीत। शिष्यविषयेऽपि योग्यायोग्यविवेकः कार्यः। प्रविव्रजिषवः त्रिधा भवन्ति-पुरुषाः स्त्रियो नपुंसकाश्च। सर्वेषां पात्रतामभिवीक्ष्यैव दीक्षा देया। यतो हि विनापि पात्रतां दिदीक्षा सम्भवति। अत्र पात्रतादिदीक्षयोः चतुर्भङ्गी विचारणीया। कश्चित् पात्रः स्यात् न दिदीक्षुः, कश्चित् पात्रभूतोऽपि सन् न दिदीक्षुः कश्चिद् अपात्रः न दिदीक्षुः, कश्चित् पात्रः स्यात् दिदीक्षुरपि। अत्र प्रथमा त्रयो भङ्गाः प्रव्राजनानर्हाः। तुर्यो भङ्ग एव प्रव्राजनार्हः। उक्तमपि—

***अट्ठारस पुरिसेसु वीसं इत्थीसु दस नपुंसेसु।***
***पव्वावणाणरिहा पण्णत्ता वीयरागेहिं॥*** [निशीथसूत्रभाष्यम्-३५०५]

तदेवमनुचितस्य दीक्षापि न देयेति स्थितम् इति॥३०॥

## उचितेऽनुज्ञापना॥३१॥ इति।

उचित इति। स्पष्टम्। उचितमपि गुरुमनापृच्छ्य नाददीत। गुर्वाज्ञां विनादत्तमुचितमपि अनुचितमेवोच्यते। अन्यच्च स्वामिनोऽनुज्ञां विना नाददेद् अदत्तादानदोषप्रसङ्गात्। उक्तमपि—

***सामिजीवादत्तं तित्थयरदत्तं तहेव य गुरूहिं।***
***एवमदत्तं चउहा पण्णत्तं वीयराएहिं॥[ ]***

इदं तु अवधेयम्— अनुज्ञानुज्ञापनयोर्भेदः समस्ति। गुरोरनुमतिरनिषेधो वानुज्ञा, अनुज्ञापना पुनः विनयपूर्वं गुरूनापृच्छ्यानुमतियाचनम्। सर्वेषु कार्यजातेषु गुरवो प्रथमतया स्मरणीयाः। अवगणितगुरवो हि दीक्षां सम्प्राप्यापि भवे भ्रमन्तीति सर्वज्ञोपदेश इति॥३१॥

## निमित्तोपयोगः॥३२॥ इति।

**निमित्तेति।** निमित्तं ज्योतिःशकुनादिः, तस्योपयोगः कार्यारम्भादौ विचारः। अयं भावः— गोचरचर्यायां विहारादौ च मङ्गलरूपान् शुभान् शकुनान् गृहीत्वा निर्गन्तव्यम्। यद्यपि यतेः सर्वापि आराधना अहिंसासंयम-तपोमयी मङ्गलरूपैव, तदुक्तम्—

***धम्मो मंगलमुक्कट्ठं अहिंसा संजमो तवो।*** [दशवैकालिकसूत्रम्-१.१]

ततो निमित्तोपयोगोऽकिञ्चित्करः, तथापि आराधनाप्रतिबन्धकानां विघ्नानां प्रशमनार्थं ग्रन्थारम्भे मङ्गलमिव निमित्तोपयोगो निर्विघ्नाराधनाविषयक-विश्वासाधायकत्वेन क्रियमाणो न विरुद्ध्यति। इदं पुनरवधेयम्— उपस्थितेष्वपि विघ्नेषु यतेः समताक्षुण्णा भवति। यतो हि यतित्वं सहनशीलतायामस्तीति॥३२॥

## अयोग्येऽग्रहणम्॥३३॥ इति।

**अयोग्य इति।** अयोग्यं यतिधर्मस्यापायकारकम्, तस्याग्रहणमिति स्पष्टम्। परिग्रहस्याकाङ्क्षैव अयोग्यग्रहणस्य प्रयोजिका। सा चाभिष्वङ्गमूला, अतस्तद्धानाय यतिनाल्पोपकरणवता भाव्यम्। गृह्युपनीतेषु बहुमूल्येषु पदार्थेषु व्यामोहो न विधेय इति॥३३॥

## अन्ययोग्यस्य ग्रहः॥३४॥ इति।

**अन्येति।** अन्ये गुर्वादयो भक्तियोग्याः, तेषां योग्यं भक्तपानवस्त्रादि तस्य ग्रहः। पूर्वसूत्रस्यापवादोऽयम्।

यतिना स्वोपयोगार्थं बहुमूल्यं भक्तपानवस्त्रादि समयदर्शिका-लेखिनी-माला-स्थापनी-प्रभृति च न ग्राह्यम्, गुरु-ग्लान-बाल-तपस्वि-शैक्षाद्यर्थं तद्ग्रहणे पुनर्न दोषः। ननु कथं तत्र न दोषः तस्यापि

परिग्रहरूपत्वादिति चेत्, सत्यम्, गुर्वाद्यर्थं गृहीतस्य भक्तपानवस्त्रादेर्द्रव्य-परिग्रहरूपत्वेऽपि ममत्वाभावेन भावपरिग्रहरूपत्वाभावात्, प्रत्युत भक्तिरूपत्वेन गुणाधायकत्वाददोषः। गुणसम्पन्नस्य भक्तेरप्राप्तगुणप्रापकत्वेन प्राप्तगुणसंवर्धनेन च भावविशुद्ध्याधायकत्वाद् इति॥३४॥

## गुरोर्निवेदनम्॥३५॥ इति।

**गुरोरिति।** स्पष्टम्। नवरं सद्भावनया कृता शुभापि प्रवृत्तिर्गुर्वाज्ञापूर्विकैव सफला भवतीति भगवदाज्ञा। गुरुमननुज्ञाप्यादृता शुभापि प्रवृत्तिरविहित्वेन गर्हिता तत्र तत्र। अतः प्रवृत्तेः पूर्वमपि गुरूणामाज्ञा ग्राह्या पश्चादपि गृहीतस्योपलब्धस्य वा सर्वस्याप्युपकरणजातस्य 'एतन्मयास्माद् गृहीतं उपलब्धं वा एवम्प्रकारेण गृहीतम् उपलब्धं वा अस्यार्थं गृहीतं उपलब्धं वा' इति निवेदनं कार्यम्। ननु किमर्थं गुरुः पश्चादपि निवेदनीयः? इति चेद्, उच्यते, शिष्येनाज्ञातं बहु गुरुर्जानाति अतः तन्निवेदनेन बहुभ्योऽपायेभ्यो रक्षणं भवति यतेः। तदुक्तम्—

***वासावासं पज्जोसविए भिक्खू य इच्छिज्जा गाहावइकुलं भत्ताए वा पाणए वा निक्खमित्तए वा पविसित्तए वा नो से कप्पइ अणापुच्छित्ता आयरियं वा उवज्झायं वा पवत्तिं वा गणिं वा गणहरं वा गणावच्छेययं वा जं वा पुरओ काउं विहरइ, कप्पइ से आपुच्छित्ता आयरियं वा उवज्झायं वा पवत्तिं वा गणिं वा गणहरं वा गणावच्छेययं वा जं वा पुरओ काउं विहरइ— इच्छामि णं भंते! तुब्भेहिं अब्भणुन्नाए समाणे गाहावइकुलं भत्ताए वा पाणए वा निक्खमित्तए वा पविसित्तए वा, ते य से वियरिज्जा एवं से कप्पइ गाहावइकुलं भत्ताए वा पाणए वा निक्खमित्तए वा पविसित्तए वा, ते य से नो वियरिज्जा एवं से नो कप्पइ गाहावइकुलं भत्ताए वा पाणए वा निक्खमित्तए वा पविसित्तए वा, से किमाहु भंते! आयरिया पच्चवायं जाणंति॥ एवं विहारभूमिं वा वियारभूमिं वा अन्नं वा जं किं पि पओयणं एवं गामाणुगामं दुइज्जित्तए॥*** [कल्पसूत्र२७४,२७५] इति॥३५॥

## स्वयमदानम्॥३६॥ इति।

## तदाज्ञया प्रवृत्तिः॥३७॥ इति।

**स्वयमिति। तदाज्ञयेति।** स्पष्टं सूत्रद्वयम्। नवरं गृहीतम् उपलब्धं वोपकरणजातं यदर्थं गृहीतं उपलब्धं वा यद्योग्यं तस्मै यतिः स्वयमेव न दद्यात्, किन्तु गुरवे समर्पयेत्। गुरुस्तस्मै दास्यतीत्ययं सार्वज्ञशासनीनो विधिः। यतः सर्वस्यापि भक्तपानादेः प्रदाने गुरुरेवाधिकारित्वेनोक्तः। कदाचित् संयोगविशेषमालम्बनान्तरं वा वीक्ष्य योग्यस्यापि भक्तपानादिप्रदानं गुरुर्निषेधयेदपि तदा यथा गुरुरादिशति तथा विदध्यात्। गुर्वाज्ञापूर्विकया प्रवृत्त्यैव शिष्यत्वं शोभते, नान्यथा। एतेन गुर्वाज्ञाधीनेन शिष्येण शासनं गच्छश्च दीप्येते इति सूचितं भवति॥३६॥३७॥

## उचितच्छन्दनम्॥३८॥ इति।

**उचितेति।** उचिता वन्दनाहारादिग्रहणप्रदानादिव्यवहारविषया यतयः, तेषु च्छन्दनम् आहारादिप्रवृत्तिः।

इह हि समानसामाचारीवतां व्यवहारः प्रवर्तत इति व्यवहारसूत्रादौ प्रतिपादिता मर्यादा। तदनुसृत्यैव

सर्वोऽपि व्यवहारो यतिना कर्तव्यः। यैः सह सूत्रार्थादिसप्तमण्डलीनां व्यवहारो नास्ति तैः सह न व्यवहर्तव्यम्[१] इति॥३८॥

**धर्मायोपभोगः॥३९॥** इति।

**धर्मायेति।** धर्मः सर्वविरतिपरिणामः तदर्थम् अप्राप्तस्य प्राप्तिरूपं प्राप्तस्य रक्षणरूपं वा प्रयोजनमधिकृत्य उपभोगः अल्पो मात्रां मर्यादां चानतिक्रम्य भोग आहारादीनामिति सूत्रार्थः। अयं भावः—यतिः सर्वमपि आहारादिकम् अन्यद् वोपकरणजातं गुरुमनुज्ञाप्यैवोपभुञ्जीत। तदपि धर्मार्थमेव। यतो हि धर्मार्थमेव यतीनाम् आहारादिग्रहणमनुमतम्। आहारेऽक्रियमाणे आवश्यकक्रियाः विसत्स्यन्ते, वैयावृत्यं न निर्वर्त्स्यते, स्वाध्यायः निरोत्स्यत इति प्रतिसन्धाय गृह्यमाण आहारो धर्माय भवति। एवमेवोपकरणादिष्वपि ज्ञेयम् इति ।

तदुक्तं स्थानाङ्गे—

***छहिं ठाणेहिं समणे निग्गंथे आहारमाहारेमाणे णातिक्कमति,***

***तं जहा—***

***वेयणवेयावच्चे इरियट्ठाए य संजमट्ठाए।***

***तह पाणवत्तियाए छट्ठं पुण धम्मचिंताए॥*** [स्थानाङ्गसूत्रम् २, ६.५००]

प्रकृतोपयोगित्वेनास्या अर्थलेश आचार्यश्रीमदभयदेवसूरीयवृत्तेरुपन्यस्यते।

***छही***त्यादि *कण्ठ्यम्, नवर**माहारम्** अशनादिक**माहारयन्** अभ्यवहर**न्नातिक्राम**त्याज्ञाम्, **पुष्टकारण**त्वाद्, अन्यथा त्वतिक्रामत्येव, रागादिभावात्, तद्यथा- **वेयणे**त्यादिगाथा, **वेदना** च क्षुद्वेदना **वैयावृत्यं** च आचार्यादिकृत्यकरणं **वेदनावैयावृत्यं** तत्र विषये भुञ्जीत, वेदनोपशमनार्थं वैयावृत्यकरणार्थं चेति भावः, **ईर्या** गमनं तस्या विशुद्धिः युगमात्रनिहितदृष्टित्वम् ईर्याविशुद्धिस्तस्यै इद**मीर्या**विशुद्ध्यर्थम्, इह च विशुद्धिशब्दलोपा**दीर्यार्थ**मित्युक्तम्, बुभुक्षितो हीर्याशुद्धावशक्तः स्यादिति तदर्थमिति, **चः** समुच्चये, **संयमः** प्रेक्षोत्प्रेक्षा-प्रमार्जनादिलक्षणः, **तदर्थम्, तथेति** कारणान्तरसमुच्चये, **प्राणाः** उच्छ्वासादयो बलं वा प्राणस्तेषां तस्य वा **वृत्तिः** पालनं **तदर्थं** प्राणसन्धारणार्थमित्यर्थः, **षष्ठं पुनः** कारणं **धर्मचिन्तायै** गुणनानुप्रेक्षार्थमित्यर्थः।* इत्येतानि षट् ***कारणानीति।*** अत्र ***भाष्यगाथे-***

***नत्थि छुहाए सरिसा वियणा भुंजिज्ज तप्पसमणट्ठा।***
***छाओ बुभुक्षितः वेयावच्चं न तरइ काउं अओ भुंजे॥***

***इरियं न य सोहेइ पेहाईयं च संजमं काउं।***
***थामो वा परिहायइ गुणणुप्पेहासु य असत्तो॥*** [पिण्डनि.२६३-२६४] त्ति।

---

१ यद्यपि भिन्नसामाचारीवद्भिः यतिभिः सह वन्दनाहारादिग्रहणप्रदानादिव्यवहारो नास्ति तथापि तेषाम् अभ्युत्थानासनप्रदानफिट्टावन्दनादिकम् औचित्यं सर्वदैव कर्तव्यम्, तेषामपि भगवच्छासनाराधकत्वेन गुणसम्पन्नत्वात्। एतेन एवं सामाचारीभेदेन यतीनां भेदकरणमनुचितमित्यपि प्रत्युक्तम्, तस्य गुणरक्षणहेतुकत्वात्।

अथ तुर्यमहाव्रतरक्षोपयोगिनीं नव ब्रह्मचर्यवृतिं दर्शयति—

**विविक्तवसतिसेवा॥४०॥** इति।

**विविक्तेति।** विविक्ता स्त्री-पशु-पण्डकैरनाश्रिता वसतिः उष्यतेऽस्यामिति व्युत्पत्त्या उपाश्रयादि वसनस्थानम् तस्याः सेवा उपभोगः। यतिधर्मे ब्रह्मचर्यव्रतमन्येभ्यो व्रतेभ्यो दुष्करतरम्। विना मनसो नियन्त्रणं ब्रह्मचर्यपालनमसम्भवीति मनसो नियन्त्रणार्थं नव वृतय उपदिष्टा भगवद्भिः। वृतौ स्थितो नियन्त्रितमना यतिः ब्रह्मचर्यमनायासेन पालयितुं प्रभवतीति भावः। जलसदृशं ह्येतन्मनोऽधोगमनशीलमनालम्बनं सदसदालम्बनं वा सदिति मनसा दृढेनाऽपि यतिना स्वकीयं मनोऽसदालम्बनेभ्यः प्रयत्नतः तद्रक्षणीयम्। वसतौ यतिं विहायान्येषां वासोऽपि सम्यग् विवेचनीयः। तदुक्तम्—

***कुसीलवड्ढणं ठाणं दूरओ परिवज्जए॥*** [दशवैकालिकसूत्रम् ६-५९]

यतिनीभिस्तु पुरुष-पशु-पण्डकरहितायां वसतौ स्थेयमिति तु अनुक्तमपि सामर्थ्याद् ज्ञेयम्, एवमग्रेऽपि इति॥४०॥

**स्त्रीकथापरिहारः॥४१॥** इति।

**स्त्रीति।** स्त्रीभिः सह कथा आलापसंलापादिरूपा स्त्रीकथा स्त्रीणां वा कथा स्त्रीविषयिणी कामोद्दीपिका वार्ता तस्याः परिहारः प्रयत्नपूर्वकं वर्जनम्। नित्यमेव स्वाध्याये रममाणो यतिः मौनमेवासेवते। प्रसङ्ग उपस्थिते धर्मकथां कुर्यात् परं स्त्रीभिः सह स्त्रीविषयिणीं वा विकथां कदापि न कुर्वीत इति॥४१॥

**निषद्यानुपवेशनम्॥४२॥** इति।

**निषद्येति।** निषद्या उपवेशनार्थमासनम्, तत्र अनुपवेशनम्। यत्रासने स्त्री उपविष्टा तत्र मुहूर्तान्तं यतिर्नोपविशेत्, यत्र च पुरुष उपविष्टः तत्र षण्मुहूर्तान्तं यतिनी नोपविशेदिति मर्यादा। मर्यादां विना यतिधर्मपालनं न शुद्ध्यतीति।

**इन्द्रियाप्रयोगः॥४३॥** इति।

**इन्द्रियेति।** इन्द्रियाणि चक्षुरादीनि तेषामप्रयोगो विजातीयविषयेऽप्रवर्तनम्। विजातीयस्य अङ्गानि मुख-हस्त-पाद-कटिप्रभृतीनि उपाङ्गानि च अङ्गुली-नयन-वक्षोजादीनि सरागं न निरीक्षेत। विजातीयासक्तौ लुब्धानां हि न केवलम् अवश्यम्भावि पतनमपि तु पुनरुत्थानमपि आर्द्रककुमाराषाढाभूत्यादीनामिव दुर्घटं भवति। अत्रेदमवधेयम्—सूत्रे इन्द्रियाप्रयोगः सामान्येन उक्तोऽपि विशेषतः चक्षुर्विषयो भवति, चक्षुषो विषयसम्पर्काभावेऽपि प्रवृत्त्युपलब्धेः। अत एव आत्महितकामेन संयमरतिना यतिना इतस्ततो भ्रमन्ती चक्षुषी वारणीये इति॥४३॥

**कुड्यान्तरदाम्पत्यवर्जनम्॥४४॥** इति।

**कुड्यन्तरेति।** कुड्यं भित्तिः, कुड्यस्यान्तरा वर्तमानं दाम्पत्यं दम्पत्योर्भावो यत्र तत्तथा तस्य वर्जनम् परिहारः। अयं भावः— यतिनोत्सर्गतो विविक्तायामेव वसतौ स्थेयम्। सति कारणे गृहस्थसम्पृक्तवसतौ वासे कर्तव्ये यस्यां वसतौ यतीनां दम्पत्योर्दम्पतीनां वावासस्थानयोर्मध्ये एकस्या एव भित्तेर्व्यवधानं वर्तते तत्स्थानं विवर्जनीयम्। यतोऽविवेकिनोः कामासक्तयोर्दम्पत्योः शब्दश्रवणादपि यतिधर्म-परिणामः पतेदपीति॥४४॥

## **पूर्वक्रीडितास्मृतिः॥४५॥** इति।

**पूर्वेति।** पूर्वं गृहस्थावस्थायां क्रीडितं कामासेवनम्, तस्य अस्मृतिः संस्काररूपस्य अनुद्बोधनम्। पूर्वक्रीडितस्मृतौ हि यतिः साधनापथः भ्रंशेत्। अयं नियमो भुक्तभोगिनामेवेति टीकाकृतः। अभुक्तभोगिनां तु औत्सुक्याभावरूपः स इति तु वयम् इति॥४५॥

## **प्रणीताभोजनम्॥४६॥** इति।

**प्रणीतेति।** प्रणीतं विकृत्याधिक्येन निष्पन्नं अतिस्निग्धं घृतपूरादि तस्य अभोजनम् अनभ्यवहारः। स्निग्धं भोजनं प्रायो विकारजनकं भवति अल्पसत्त्वानामतो यतिः जीरणे गुरूणि द्रव्याणि नोपभुञ्जीत। चन्द्रिकौदन-व्यञ्जनतेमनानि[१] विहायान्यत् सर्वं विलास इत्युच्यते। चन्द्रिकापि घृतेनाम्रक्षिता अल्पीयसा घृतेन म्रक्षिता वाभ्यवहार्या। विकृतिर्वनस्पतिश्च बलाद्दुर्गतिं नयतः। तदुक्तम्—

***विगइं विगईभीओ विगइगयं जो उ भुंजए साहू।***
***विगई विगइसहावा, विगई विगइं बला नेई।।*** इति

[प्रत्याख्यानभाष्यम्, देवेन्द्रसूरिः-४०]

## **अतिमात्राभोगः॥४७॥** इति।

**अतीति।** मात्रामतिक्रम्य अतिमात्रः, तस्य अभोगः अनभ्यवहारः आहारस्येति गम्यम्। बुभुक्षाया ऊनमेवाभ्यवहर्तुर्विकारा नोद्भवन्तीति।

## **विभूषापरिवर्जनम्॥४८॥** इति।

**विभूषेति।** विशिष्टा स्नान-विलेपनादिरूपा भूषा स्वपरकामोत्पादहेतुभूतः शरीरसंस्कारः, तस्य परिवर्जनम् परिहारः। यतिः कायेन मलीमस एव शोभते। उज्ज्वलैः आकर्षकैर्वर्णाकृत्यादिभिर्वस्त्रादिभिर्यतिध र्मस्य परिणामः तच्छोभा च हीयते। अत एवोक्तं भगवता शय्यम्भवसूरिणा दशवैकालिके—

***नगिणस्स वावि मुंडस्स दीहरोमनहंसिणो।***
***मेहुणा उवसंतस्स किं विभूसाइ कारिअं॥***

---

१ चन्द्रिका= रोटली इति भाषायाम्, व्यञ्जनं च शाक इति भाषायाम्, तेमनं च दाळ इति भाषायाम्।

*विभूसावत्तिअं भिक्खू कम्मं बंधइ चिक्कणं।*
*संसारसायरे घोरे जेणं पडइ दुरुत्तरे॥*

*विभूसावत्तिअं चेअं बुद्धा मन्नंति तारिसं।*
*सावज्जबहुलं चेअं नेअं ताईहिं सेविअं॥* [दशवैकालिकसूत्रम् ६-६५,६६,६७] **॥४८॥**

**तत्त्वाभिनिवेशः॥४९॥** इति।

**तत्त्वेति।** तत्त्वं ज्ञान-दर्शन-चारित्रात्मिका क्रिया, तस्य अभिनिवेशः तदेकनिष्ठा अनन्यचित्तता दृढसंकल्पो वा। अयं भावः— ज्ञानपूर्विका क्रिया चारित्रमित्युच्यते, अतः चारित्रं पिपालयिषुः यो यतिरन्यसाधको वा तद्वृद्ध्यर्थं ज्ञान-दर्शनवृद्ध्यै यतते तस्यैव तत्त्वाभिनिवेशो भवति। ज्ञानरहितां केवलकायकष्टरूपां क्रियामाचरतः चारित्रं न भवत्येव। एवं शक्तिं निगूहमानस्यापि चारित्रे आदरो न भवति। तत्त्वेऽनभिनिविष्टस्य आराधना सीदति। गुणवृद्ध्यै दोषक्षयाय च यतमानो यतिराराधको भवतीति ज्ञेयम्॥४९॥

अथ पञ्चममहाव्रतरक्षोपायमाह—

**युक्तोपधिधारणा॥५०॥** इति।

**मूर्च्छात्यागः॥५१॥** इति।

**युक्तेति। मूर्च्छेति।** युक्तः प्रमाणोपेतः, उप सामीप्येन धियते धार्यते यतिधर्मपरिणामोऽनेनेति उपधिः तस्य धारणा। मूर्च्छा बाह्यभावेषु ममत्वभावः तस्य त्यागः। मूर्च्छाजनकत्वेन यतिः अधिकामुपधिं न धारयेत्। आस्तां तावदुपधौ यतिः स्वशरीरेऽपि नासज्जते। येन प्रकारेण शरीरस्य बलं शोभासक्तिश्च वर्धन्ते तत्सर्वं हेयम्। यतिनाल्पोपधिना अमहार्घोपधिना तत्रापि चामूर्च्छितेन भाव्यम्। त्यक्तगृहादि-ममत्वस्यापि यतेः उपधौ आसक्तौ सत्यां यतित्वं व्यर्थमिति॥५०॥५१॥

उक्ता मूलगुणाः, अधुनोत्तरगुणविषयं रक्षोपायमाह—

**अप्रतिबद्धविहरणम्॥५२॥** इति।

**अप्रतिबद्धेति।** प्रतिबन्धो रागः, प्रतिबद्धः सरागः, अप्रतिबद्धो निरागः, विहरणं ग्रामानुग्रामं विचरणम्। द्विविधो हि विहारकल्पो यतीनामुक्तः। एको मासकल्प ऋतुबद्धकाले, अन्यो पर्युषणाकल्पो वर्षाकाले। अनुकूलवसत्यादौ ममत्वपरिहारार्थमयमुपदेशः। अनगारो हि यतिः अल्पकालीनायां वसतौ कथं ममत्वभावमुपैति? न शोभते तस्यैतत्। गृहीतलिङ्गस्य पुण्यं वर्धते, स सर्वत्रादरमाप्नोति, वसत्यादिकमपि उत्तमं लभते तथापीदृशैः प्रलोभनैर्यतिर्न लिप्यति। वसतिनिमित्तकस्य ममत्वस्य परिहारार्थं यतिरष्टौ मासान् ग्रामानुग्रामं विहरति। अनुकूलवसत्यादौ च ममत्वभावं नोपैति॥५२॥

**परकृतबिलवासः॥५३॥** इति।

**अवग्रहशुद्धिः॥५४॥** इति।

**परकृतेति। अवग्रहेति।** परो यतेरन्यो गृहस्थादिः, तेन कृतं बिलमिव बिलं गृहादिकम्, तस्मिन् वासः। तत्रापि अव असाकल्येन गृह्यते इति अवग्रहः तस्य शुद्धिः अनुज्ञादानादिना। अयं भावः— यथा सर्पः परकृते बिले निवासं करोति तथैव यतिरपि परकृते आवासे वसति। यत्यर्थमेव निर्मितायां वसतौ यतेर्वासो न कल्पते। गृहस्थैः स्वार्थम् आराधनार्थं वा निर्मितायां वसतौ पुनः तमनुज्ञाप्यैव वासः कल्पते। तदर्थमवग्रहो याच्यते। स च देवेन्द्र-चक्रवर्ति-नृपति-शय्यातर-साधुभेदात् पञ्चविधः। तदुक्तम्—

***सुयं मे आउसं तेणं भगवया एवमक्खायं— इह खलु थेरेहिं भगवंतेहिं पंचविहे उग्गहे पण्णत्ते, तं जहा— देविंदोग्गहे राओग्गहे गाहावतिउग्गहे सागारियउग्गहे साधम्मियउग्गहे।***

[आचा. चूला-१ उ.२ सू.६३५]

अस्यार्थलेश उपयोगित्वाद् भाष्यवृत्तेरुपन्यस्यते।

देवेन्द्रः—शक्र ईशानो वा, स यावतः क्षेत्रस्य प्रभवति तावान् देवेन्द्रावग्रहः। राजा—चक्रवर्त्तिप्रभृतिको महर्द्धिकः पृथ्वीपतिःस यावतः षट्खण्डभरतादेः क्षेत्रस्य प्रभुत्वमनुभवति तावान् राजावग्रहः। गृहपतिः—सामान्यमण्डलाधिपतिः तस्याप्याधिपत्यविषयभूतं यद् भूमिखण्डं स गृहपत्यवग्रहः। सागारिकः—शय्यातरः, तस्य सत्तायां यद् गृहपाटकादिकं स सागारिकावग्रहः। साधर्मिकाः—समानधर्माणः साधवः, तेषां सम्बन्धि सक्रोशयोजनादिकं यद् आभाव्यं क्षेत्रं स साधर्मिकावग्रहः।

***हेट्ठिल्ला उवरिल्लेहिं बाहिया न उ लहंति पाहन्नं।***
***पुव्वाणुन्नाभिनवं, च चउसु भय पच्छिमेऽभिनवा॥*** [बृभा. ६६९ वृ.]

राजावग्रहे राजैव प्रभवति न देवेन्द्रः, ततो देवेन्द्रेणानुज्ञातेऽप्यवग्रहे यदि राजा नानुजानीते तदा न कल्पते तदवग्रहे स्थातुम्। अथानुज्ञातो राज्ञा स्वविषयावग्रहः परं न गृहपतिना, ततस्तदवग्रहेऽपि न युज्यतेऽवस्थातुम्। एवमुपरितनैरधस्तना बाध्यन्ते। यो यदावग्रहार्थं साधर्मिकमुपसम्पद्यते स सर्वोऽपि तदानीं तमनुज्ञाप्यैवावतिष्ठते नान्यथेत्यभिनवानुज्ञैवैका। [बृभा. ६७० वृ.]

अथ विहारसम्बद्धमेव विशेषमाह त्रिभिः सूत्रैः—

**मासादिकल्पः॥५५॥** इति।

**एकत्रैव तत्क्रिया॥५६॥** इति।

**सर्वत्राममत्वम्॥५७॥** इति।

**मासेति।** मासः त्रिंशत्तिथ्यात्मकः प्रसिद्धः। आदिपदात् पर्युषणा चातुर्मासीं यावदेकत्रावस्थानरूपा पर्तदुपलक्षितः कल्प आचारः। ऋतुबद्धकालेऽष्टौ मासान् योग्ये क्षेत्रे मासं यावदवस्थानम्। ममत्वादिदोषसम्भवाद् ऋतुबद्धकाले कारणं विना मासादधिकमेकत्र न स्थेयम्, किन्तु विहारः करणीयः। सोऽपि संयमनिर्वहणार्थमेव विहितोऽतः स्वाध्यायं ध्यानं संयमं च बाधित्वा क्रियमाणः प्रतिदिनं निर्निमित्तको विहारोऽपि निषिद्धः, तस्यापि संयमात्मविराधनादिदोषजनकत्वात्। क्षीणजङ्घा-बलेन आलयविहारिणा [=स्थिरवासस्थितेन] यतिना वसतिकोणादिपरावर्तनेन मासकल्पमर्यादा रक्षणीयेत्याह— **एकत्रैवेति।** एकत्र ऋतुबद्धकाले यत्र मासादधिकं स्थीयते तत्स्थानं तत्र। एवकारस्यात्यन्तायोगव्यवच्छेदार्थत्वात् क्रियाया अवश्यकरणीयत्वं सूच्यतेऽत्रापवादो नास्तीति तात्पर्यम्। तत्क्रिया मासकल्पमर्यादा। ननु कस्मादस्यां मर्यादायामपवादो नास्तीत्यत्र हेतुमाह— **सर्वत्रेति।** त्यक्तगृहवासस्य यतेः वसत्यादौ स्थाने ममत्वादिदोषसम्भावनाया आधिक्येन एषा मासकल्प-मर्यादोपदिष्टा भगवद्भिरिति। सर्वत्रेत्यनेन अन्यत्राप्युपकरणादौ ममत्वं न विधेयम् इत्युक्तम् इति॥५५॥५६॥५७॥

अथास्यैव महाव्रतरूपस्य मूलयतिधर्मस्य परिपोषकान् अन्यगुणानाह—

**निदानपरिहारः॥५८॥** इति।

**निदानेति।** निदानं धर्मस्यैहिकफलाशंसा तस्य परिहारः प्रतिबन्धः। ऐहिकफलासंशागर्भितधर्मजनितं सुखं दुर्गतिकारणं भवति। पुद्गलसङ्गप्रसञ्जितसुखे व्यामोहजनकत्वेनैव संसारोऽयं भयावहः। सांसारिकसुखापेक्षैव दुःखजनिका। तदुक्तम्—

***अविक्खा अणाणंदे।*** [पञ्चसूत्रम्-५.३]

सांसारिकं सुखं प्राप्तमुपभुक्तं च सत् पापं वर्धयति पुण्यं हापयति च। तदासक्ता जीवाः संयमजन्यसमतारूपेण आत्मसुखेन हीयन्तेऽतो यतिधर्मफलं प्रति सांसारिकी समृद्धिर्देवलोकादिर्वा नापेक्षेत। वास्तविकं सुखं आत्मनि विद्यते। आस्वादितात्मसुखस्य यतेर्मनसि सांसारिकसुखस्य स्मृतिर्न भवति कदापि। परिपूर्णमात्मसुखं मुक्तौ वर्तते। यतो हि मुक्तस्य पुनरागमनं नास्ति। मुक्तौ आत्मसुखं कदापि न क्षीयते। शरीराभावात् मुक्तौ निरपेक्षं जन्मजरामरणादिक्लेशैरुन्मुक्तम् आत्मसुखं भवति। तदुक्तं शक्रस्तवे सिद्धिगतिवर्णनप्रस्तावे—

***सिवमयलमरुअमणंतमक्खयमव्वाबाहमपुणराविति सिद्धिगइनामधेयं ठाणं संपत्ताणं।***

[आवश्यकसूत्रम्-]

ईदृशं परमोत्कृष्टम् आत्मसुखं यतिधर्माद् भवतीति तद्विहाय तुच्छानां सांसारिकसुखानां प्रार्थना अज्ञानविलसितमेव। धर्मात् सांसारिकसुखेप्सुः धर्मजनितपुण्यबन्धप्रभावात् सांसारिकसुखानि लभते किन्तु तथाविधपरिणत्यभावात् समाधिं नैवावाप्नोति। सांसारिक-सुखानाशंसी साधक एव समाधिमाप्नोति। धर्मस्य फलत्वेन सुखमिष्टं समाधिर्वेति साधकेन स्वयमेव निश्चेतव्यम्। सुखलिप्सुः समाहितो नैव भवति, समाहितः

सुखं नैवापेक्षते। रागद्वेषयोरनुदयभावरूपायै समतायै यतमानस्य यतेर्यथा यथा संयमपर्यायो वर्धते तथा तथा तस्य तेजोलेश्या वैमानिकदेवानां तेजोलेश्यामतिक्रामते इति भगवत्यादौ प्रतिपादितम्। तद्यथा—

***जे इमे भंते! अज्जत्ताए समणा निग्गंथा विहरंति एते णं कस्स तेयलेस्सं वीतीवयंती? गोयमा! मासपरियाए समणे निग्गंथे वाणमंतराणं देवाणं तेयलेस्सं वीतीवयति। दुमासपरियाए समणे निग्गंथे असुरिंदवज्जियाणं भवणवासीणं देवाणं तेयलेस्सं वीतीवयति। एवं एतेणं अभिलावेणं तिमासपरियाए समणे निग्गंथे असुरकुमाराणं [?असुरिंदाणं] तेयलेस्सं वीतीवयति। चतुमासपरियाए समणे निग्गंथे गह-नक्खत्त-ताराख्वाणं जोतिसियाणं देवाणं तेयलेस्सं वीतीवयति। पंचमासपरियाए समणे निग्गंथे चंदिम-सूरियाणं जोतिसिंदाणं जोतिसराईणं तेयलेस्सं वीतीवयति। छम्मासपरियाए समणे निग्गंथे सोधम्मीसाणाणं देवाणं तेयलेस्सं वीतीवयति। सत्तमासपरियाए समणे निग्गंथे सणंकुमार-माहिंदाणं देवाणं तेयलेस्सं वीतीवयति। अट्ठमासपरियाए समणे निग्गंथे बंभलोग-लंतगाणं देवाणं तेयलेस्सं वीतीवयति। नवमासपरियाए समणे निग्गंथे महासुक्क-सहस्साराणं देवाणं तेयलेस्सं वीतीवयति। दसमासपरियाए समणे निग्गंथे आणय-पाणय-आरण-अच्चुयाणं देवाणं तेयलेस्सं वीतीवयति। एक्कारसमासपरियाए समणे निग्गंथे गेवेज्जगाणं देवाणं तेयलेस्सं वीतीवयति। बारसमासपरियाए समणे निग्गंथे अणुत्तरोववातियाणं देवाणं तेयलेस्सं वीतीवयति। तेण परं सुक्के सुक्काभिजातिए भवित्ता ततो पच्छा सिज्झति जाव अंतं करेति।***

***सेवं भंते! सेवं भंते! त्ति जाव विहरति॥*** [भगवती श.१४ उ.१०सू. १७]

ननु सकलानि सांसारिकसुखानि त्यक्त्वा गृहीतश्रमणवेशो यतिः पुनः सांसारिकसुखमाशंसत इति विरुद्धम् इति चेत्, सत्यम्, तथापि यावदनुकूलताप्रतिकूलतयो रागद्वेषौ स्यातां तावद् यतेरपि साम्यसुखानुभवाभावात् प्रमादादिना वा सुखाशंसा जायत इति तत्परिहारार्थं निदानपरिहारोपदेशो न विरुद्ध इति। रागद्वेषयोर्जयार्थं यतिना सदैव सुखं हीनं दुःखं श्रेष्ठम् इति सूत्रं हृदि धारणीयमिति॥५८॥

## **विहितमिति प्रवृत्तिः॥५९॥** इति।

**विहितमितीति।** विहितं कर्तव्यत्वेनोपदिष्टम्, इति हेतौ, प्रवृत्तिः आचरणम्। सर्वापि यतिधर्मसम्बन्धिनी क्रिया प्रभोराज्ञारूपेति मत्वा कर्तव्येति भावः। सर्वाण्यपि धर्मानुष्ठानानि तारकाणि यतः तानि भगवदुपदिष्टानि, सर्वाण्यपि धर्मानुष्ठानानि लाभकारीणि यतः तानि भगवता स्वयमेवाचरितानि। भगवदुपदिष्टत्वाद् भगवता स्वयमेवाचरितत्वादेव च सरलासु वा कठिनासु वा सर्वास्वपि धर्मक्रियासु तारकत्वे न कोऽपि भेदः। अतो धर्मक्रियासु अनुष्ठीयमानासु अनानन्दभावो श्रद्धाया मन्दताद्योतकः। दृढश्रद्धस्य तु सर्वदा सर्वत्र प्रत्येकासु धर्मक्रियासु अमन्दानन्दानुभव उपजायते। आसन्नसिद्धेर्भव्यस्य भगवदुपदेशे दृढैव श्रद्धा भवति। भव्यत्वादेव दृढश्रद्धो भगवदाज्ञारुचिर्यतिः धर्मक्रियाम् आचरमाणोऽहं भगवदुपदेशानुसारं प्रवर्त इति सुमहदिदमानन्दपदमिति शुभभावसम्पन्नः धर्मक्रियां सञ्जीवयतीति॥५९॥

भगवदाज्ञा वचनरूपा, सा च तज्ज्ञानेनैव सम्पद्यते, तज्ज्ञानं च स्वाध्यायाधीनमिति तदुपदेशमाह—

**विधिना स्वाध्याययोगः॥६०॥** इति।

**विधिनेति।** विधिना कालग्रहण-गुरुविनयादिरूपेण स्वाध्याययोगः सु सम्यग् आ समन्ताद् अधि अतिशयेन आधिक्येन वा आयः सर्वे गत्यर्था ज्ञानार्था इति नियमाद् बोधः, यद्वा स्वस्य आत्मन अध्यायः स्वाध्यायः तस्मिन् योगः मनोवाक्कायेन लीनतेति यावत्। अयं भावः— स्वाध्यायं विना यतिधर्मो न निर्वहति। यतिधर्मस्य प्राणभूतः स्वाध्यायः। यस्मै स्वाध्यायो न रोचते तस्य यतिधर्मः सीदति। आभ्यन्तरतपोरूपो हि स्वाध्याययोगः भगवता बाह्यतपसः प्रशस्ततम उपदिष्टः। द्विविधेऽपि तपसि उद्युक्तो यतिः स्वाध्याययोगे कदापि न श्राम्यति प्रमाद्यति वा। अहोरात्रीयाष्टसु प्रहरेषु आहार-विहार-निहार-निद्रार्थं त्रीन् प्रहरान् विहाय शेषाः पञ्चापि प्रहरा भगवता स्वाध्याययोगार्थमेव विहिताः। तत्रापि दिवसस्याद्यं प्रहरद्वयं सूत्रार्थपौरुषीरूपं सूत्रार्थयोर्वाचनार्थमेव प्रतिपादितम्। ग्लानाद्यागाढप्रयोजनाभावे निर्निमित्तं प्रथमालिका[१]दिषु व्यापृत्य सूत्रार्थपौरुष्यौ न व्यापादयेदिति॥६०॥

नन्वेवं सर्वं विहाय स्वाध्याय एव कर्तव्यः, तस्यैव प्रधानत्वाद् इत्याशङ्कायामाह—

**आवश्यकापरिहाणिः॥६१॥** इति।

**आवश्यकेति।** आवश्यकं सामायिकादि, तस्य परिहाणिः उपेक्षादिना इतिकर्तव्यतायां न्यूनता तदभावः। अयं भावः—यतिना स्वाध्याय एवंरीत्या कर्तव्यो येन प्रतिक्रमण-प्रतिलेखन-ग्लानादिवैयावृत्यादीनि आवश्यककृत्यानि न सीदन्ति। एवं गच्छकर्तव्यरूपाणि मण्डलीकार्याण्यपि नोपेक्षणीयानि, प्रथमं मण्डलीकार्याणि कर्तव्यानि तदनन्तरं स्वाध्याय इति यावत्। नन्वेवं आवश्यककृत्यैः स्वाध्यायः सीदतीति चेत्, न, विनयरूपज्ञानाचारात्मकत्वेन आवश्यककृत्यानां स्वाध्यायोपकारित्वात्। स्वाध्यायआवश्यकक्रिययोः परस्परं पूरकत्वात्। एवं च स्वाध्यायसमये स्वाध्यायं आवश्यककृत्यावसरे आवश्यकं कुर्वाणो यतिर्यतिधर्मे मोमुद्यते[परमं प्रमोदं प्राप्नोति] इति॥६१॥

स्वाध्यायआवश्यकक्रियासाधनोपयोगि तपःसाधनमाह—

**यथाशक्ति तपःसेवनम्॥६२॥** इति।

**यथाशक्तीति।** यथाशक्ति शक्तिमनतिक्रम्य तपः प्रक्रमाद् बाह्यमनशनादि तस्य सेवनम् आराधनम्। अयं भावः— स्वाध्यायआवश्यकक्रिययोरप्रमादसाध्यत्वाद् अप्रमादस्य च तपःफलत्वात् परमार्थसाधनोद्युक्तेन यतिना स्वशक्त्यनुसारं तपः कर्तव्यम्। तच्च तपो निजां शारीरिकीं मानसीं च शक्तिं परीक्ष्यादरणीयम्, नान्यथा आत्म-संयमविराधनादिदोषापातात्। तदुक्तम्—

---

१ नवकारसी इति भाषायाम्।

***सो हु तवो कायव्वो, जेण मणओ मंगुलं न चिंतेइ।***
***जेण ण इंदियहाणी, जेण य जोगा ण हीयन्ते॥*** [पञ्चवस्तु-२१४]

स्वाध्यायआवश्यकक्रियाः साध्यं तपश्च तत्साधनम्। साध्यसिद्ध्यै हि साधनेऽपवादो भवति, न पुनः साधनार्थं साध्यमपोद्यते[साध्येऽपवादो भवति]। इति स्वाध्याय-आवश्यक-क्रियासाधनानुकूलमेव तपो विधेयम्, न पुनः तपोऽर्थं स्वाध्यायआवश्यकक्रियाद्युपेक्षणीयमिति। अत एव नित्यैकाशनं तपो विहितं यतेः। तदुक्तम्—

***एगभत्तं च भोयणं॥*** [दशवैकालिकसूत्रम्-६.२३]

किञ्च, तपसि निजां शारीरिकीं मानसीं च शक्तिं न निगूहयेत्। शक्तिं निगूहमानो यतिः वीर्यान्तरायं बध्नाति। यः तपसि यथाशक्ति न पराक्रमते स यतिरेव न भवति। परीषहासहनशीलस्य आत्मोद्धारः कथं भवितेति विचार्य तपसि यथाशक्ति यतनीयं यतिना। इतरदर्शनेऽपि उक्तम्—

***नातपस्विनो योगः सिद्ध्यति ।*** [पायोभा] इति॥६२॥

सर्वमपि धर्मानुष्ठानं सानुबन्धं यथा स्यात् तथा कर्तव्यम्, यतः सानुबन्धेन तेन परत्रापि भावधर्मावाप्तिर्भवति। अनुबन्धश्च परानुग्रहेण भवतीति तत्कर्तव्यतामाह—

## **परानुग्रहक्रिया॥६३॥** इति।

**परानुग्रहेति।** पर आत्मनो भिन्नो यतिर्गृहस्थो वा, तस्य अनुग्रहः हितसम्पादनेच्छारूपः प्रसादः, तस्य क्रिया करणम्। भीमे भवोदधौ भाग्यवतैव यतिधर्मोऽवाप्यते। यतो विनैनं आत्मोद्धारः सुदुष्करतरः। यतिधर्मेणैव चात्मकल्याणं सम्भवतीति मत्वा सर्वेण बल-वीर्य-पराक्रमेणायमाराधनीयः। यतिधर्मे रतः परभावविमुखोऽप्रमत्तो यतिरुत्कृष्टाम् आराधनां करोति। एवं हि तस्य यतिधर्मः सिद्ध्यति। सिद्धस्य हि धर्मस्य परेभ्यो विनियोगः कर्तव्य इति शास्त्रोपदेशाद् हीनगुणेषु गुणहीनेषु च सत्त्वेषु उपदेश-प्रेरणादिना प्रकारेण धर्मस्य तद्बीजस्य वा आधानं कर्तव्यत्वेनोपदिष्टम्। तच्च करुणाभावनयैव सम्पद्यते। अविदितधर्मा अविहितधर्मा वा जीवा संसारे बम्भ्रमन्तो दुःखमेवाप्नुवन्ति, धर्मं विना तेषां न त्राणं न च शरणं किञ्चिदिति विभाव्य सिद्धधर्मो यतिर्यथा मया स्वगुरोरन्यस्य वा सकाशाद् धर्मोऽधिगतः तथान्योऽपि मत्सकाशाद्धर्ममवाप्य संसारान्निस्सरतु इति निरपेक्षया करुणया तेषां धर्ममुपदिशेत्। धर्मं विहाय नान्यत्किञ्चिद् यतेर्देयम् अस्तीति॥६४॥

परानुग्रहो हि करुणाभावनाजन्यः, करुणा च गुणानुरागप्रभवा कषायाविष्टे चित्ते नोत्पद्यत इति गुणानुरागसम्पादनार्थं कषायजयोपायान् दिदर्शयिषया भूमिकामारचयति—

## **गुणदोषनिरूपणम्॥६४॥** इति।

**गुणेति।** गुणाः शान्त्यादयो वक्ष्यन्ते, दोषाः कषायादयोऽपि वक्ष्यन्ते, तेषां निरूपणम् आलोकनम् गुणानां गुणत्वेन दोषानां च दोषत्वेन विवेचनमिति यावत्। साधकेन आत्मनो गुणा दोषाश्च विवेकपूर्वकं निरीक्षणीयाः।

गुणदर्शनेन गुणा वर्धन्ते, दोषदर्शनेन दोषा हीयन्ते। गुणानां वृद्धिः दोषानां हानिरेव आराधनायाः प्रधानं लक्षणम्। तत्र तावद् दोषदर्शनं प्रथमं कार्यं यतिना। यतो हि वस्तुत आत्मनो दोषान् आत्मैव जानाति, सर्वान् तान् गुरुरपि ज्ञातुं न प्रभवति। सर्वथा दोषेभ्यः सावधानीभूय[नेन] आत्मा रक्षणीयः, अन्यथा निश्चितोऽधःपातः। तदुक्तम्—

***अप्पा खलु सययं रक्खियव्वो, सव्विंदियेहिं सुसमाहिएहिं।***
***अरक्खियो जाइपहं उवेइ, सुरक्खिओ सव्वदुहाण मुच्चइ॥***

[दशवै.चू.-२.१६]

ननु दोषदर्शनेन दोषा हीयन्त इति प्रतीमः किन्तु गुणदर्शनेन गुणा वर्धन्त एवेति न प्रतीमः यतो गुणदर्शनेन गुणानामभिमानोऽपि वर्धेतेति चेत्, सत्यम्, तथापि दोषदर्शनेन इतरैः दोषैः सहाभिमानोऽपि हीयते एवेति। तत आत्मशुद्धिमभीप्सता यतिना बाध्यमानानां दोषानां तीव्रमन्दोत्कटानुत्कटादीनां दोषधर्माणां दोष-हानोपायानां च सन्ततं चिन्तनं कर्तव्यम्। ऋजुभूतः साधक एव दोषेभ्य आत्मानं रक्षितुं शक्नोति। उक्तमपि—

***सोही उज्जुअभूयस्स, धम्मो सुद्धस्स चिट्ठइ।*** [उत्तरा.३.१२]

ननु दोषदर्शनमात्रेण दोषा ज्ञायन्ते कथं पुनर्हीयन्ते? इत्याशङ्कायां प्रसाधकतमं दोषहानोपायं दर्शयति—

## **बहुगुणे प्रवृत्तिः॥६५॥** इति।

**बहुगुण इति।** बहुशब्दोऽत्र बहुमानादिवत् प्राधान्यवाचको न तु सङ्ख्यावाचकः, बहवो गुणा यस्मिन् स तथा, तस्मिन् योगे प्रवृत्तिः प्रकर्षेण आदरादिसहितं यतनम्। अयं भावः—गुणप्रधानं हि जीवनं यतीनां भवति। सर्वे गुणाः समकालमेव न प्राप्यन्तेऽतो यस्मिन् काले ये ये गुणा अवाप्तुं शक्यन्ते तत्प्राप्तौ दृढप्रयत्नवता भाव्यं यतिना। यथा यथा धर्मो वर्धते तथा तथा गुणा वर्धन्ते। यथा यथा गुणा वर्धन्ते तथा तथा दोषानां बाधकशक्तिर्हीयते। अयं हि प्रबलतरो दोषहानोपायः यद् बहुगुणे योगे प्रवृत्तिः। तदर्थं भवितव्यं गुणप्रधानेन सर्वास्वपि प्रवृत्तिषु, यतनीयमनवाप्तगुणावाप्तौ, अनुमोदनादिभावेन वर्धनीया गुणाः, पुनः पुनरभ्यासेन द्रढीकर्तव्या अवाप्तगुणाः, वर्जनीयो हीनगुणादिसंसर्गः, सर्वात्मना गुणेष्वेव बद्धादरेण भाव्यम्। यतो हि गुणा एवायाससाध्याः, दोषास्तु अनायासमेवाविशन्ति। अनन्तेष्वात्मगुणेषु कतिपयानामपि गुणानामुद्घाटनेन अचिरेण मुक्तौ वासः सम्पत्स्यत इति॥६५॥

ननु के ते गुणा येषु प्रवृत्तिरभीष्टा? इति जिज्ञासायामाह—

## **शान्तिर्मार्दवमार्जवमलोभता॥६६॥** इति।

**शान्तिरिति।** क्रोधाभावः शान्तिः, मृदोर्भावो मार्दवम्, ऋजोर्भाव आर्जवम्, न लोभोऽलोभः तद्भावोऽलोभता। एतेषां लक्षणं तु स्वयमेव वक्ति सूत्रकारः। तथा हि—

## **क्रोधाद्यनुदयः॥६७॥** इति।

**क्रोधादीति।** क्रोधादीनां चतुर्णां कषायाणाम्, उदयो विपाकोदयरूपेण वेदनम् अनुभवनम्, न

उदयोऽनुदयः विपाकाननुभवः। तथा च— क्रोधविपाकाननुभवः शान्तिः, मानविपाकाननुभवः मार्दवम्, मायाविपाकाननुभवः आर्जवम्, लोभविपाकाननुभवोऽलोभतेति। चत्वारोऽप्येते चारित्रमोहनीयकर्मरूपाः प्रत्येकं अनन्तानुबन्ध्यप्रत्याख्यानावरण-प्रत्याख्यानावरण-सञ्ज्वलन-भेदाः षोडशविधा भवन्ति। तत्र क्रोधः चारित्र-मोहनीयकर्मोदयेन प्रतिकूलविषयद्वेषजन्यो मुखरागाद्यनुमेय आत्मपरिणामविशेषः। मानोऽपि चारित्रमोहनीयकर्मोदयेन इतराभिभवात्मकद्वेषजन्यः स्वप्रशंसा-स्वाभीष्टाश्लेषाकरण-पूज्यानमनाद्यनुमेय आत्म-परिणामविशेषः। माया चारित्रमोहनीयकर्मोदयेन रागजन्यः मनोवक्रतारूपः स्वाकूताच्छादनानृतभाषणाद्यनुमेय आत्मपरिणाम-विशेषः। लोभः चारित्रमोहनीय-कर्मोदयेन विषयमूर्च्छात्मकरागजन्यः परिग्रहादानाद्यनुमेय आत्मपरिणाम-विशेषः॥६७॥

क्रोधाद्यनुदयसम्पादनोपायमाह—

**वैफल्यकरणम्॥६८॥** इति।

**वैफल्यमिति।** विफलस्य भावो वैफल्यं निष्फलमिति यावत्, करणम् आपादनम्। आत्मसाधको यतिः कषायजयार्थं सततं प्रयतेत। कषायजयार्थं यतमानस्यैव क्षमाश्रमण इति विशेषणं सार्थकं भवति। अत्र च क्षमेत्युपलक्षणं मानादीनाम्। षोडशसु पूर्वोक्तेषु कषायभेदेषु यतेः सञ्ज्वलनकषायाणामुदय एव बाधतेऽन्येषाम् अनन्तानुबन्ध्यप्रत्याख्यानावरण-प्रत्याख्यानावरणानाम् उदयो यतेर्न भवत्येव। निमित्तमासाद्य हि कषायेषु उदयमागच्छत्सु आगतेषु च कषायजयार्थं त्वरितमेव प्रयतनीयम्। तत्र मनागपि विलम्बो न कार्यः। यतो हि अनिवार्यमाणो हि सूक्ष्मोऽपि कषायोऽचिरादेव बलं प्राप्य शुभपरिणामं हन्ति। उक्तमपि हि—

***अणथोवं वणथोवं, कसायथोवं च अग्गिथोवं च।***
***थोवं पि न विससियव्वँ, अप्पं पि से बहुं होइ॥*** [विशेषावश्यकभाष्यम्-१३१०]

स च द्विधा भवति कषायोदयादर्वाक् तत्पश्चाच्च। कषायोदयादर्वाक् कषायाणामुदय-निमित्तं कषायाणाम् उदयनिरोधोपायं च विचिन्तयेद्। ततः यैर्निमित्तैः कषायाणामुदय आशु भवति तानि परिहर्तव्यानि। यैश्चोपायैरासेवितैः कषाय उपशान्तो भवति तानि निरन्तरमासेव्यानि। एवं हि कषायो निष्फलो निर्बलो वा भवति। उक्तमपि —

***सञ्चिन्त्य कषायाणामुदयनिमित्तमुपशान्तिहेतुं च।***
***त्रिकरणशुद्धमपि तयोः परिहारासेवने कार्ये॥*** [प्रशमरतिः-१४७]

तथा-

***उवसमेण हणे कोहं माणं मद्दवया जिणे।***
***मायं चज्जवभावेण लोहं संतोसओ जिणे॥*** [दशवैकालिकसूत्रम्-८.३९]॥६८॥

अथ कथमपि दर्शितस्वविपाकस्य कषायस्य निरनुबन्धीकरणार्थं यत्कर्तव्यं तदुपदिशति—

## विपाकचिन्ता॥६९॥ इति।

**विपाकेति।** विपाकः कर्मफलपरिणामः रसोदय इति यावत्। तस्य चिन्ता अनुध्यानम्। तच्चैवम्—कषायोदये प्रवर्तमाने यद्यायुःकर्म बध्नीयां तदा का मे गतिर्भाविनी? अविरतिं त्यक्त्वा यतिभूतोऽहं यदि कषायव्यसनेमात्मानं न रक्षिष्यामि तदा मे सत्यपि यतिवेषे निश्चितैव दुर्गतिर्भविष्यतीत्यादि चिन्तनीयम्। विपाकचिन्ता चैवम्—

***स क्रोधमानमायालोभैरतिदुर्जयैः परामृष्टः।***
***प्राप्नोति याननर्थान् कस्तानुद्देष्टुमपि शक्तः॥***

***क्रोधात्प्रीतिविनाशं मानाद्विनयोपघातमाप्नोति।***
***शाठ्यात्प्रत्ययहानिं सर्वगुणविनाशनं लोभात्॥***

***क्रोधः परितापकरः सर्वस्योद्वेगकारकः क्रोधः।***
***वैरानुषङ्गजनकः क्रोधः क्रोधः सुगतिहन्ता॥***

***श्रुतशीलविनयसन्दूषणस्य धर्मार्थकामविघ्नस्य।***
***मानस्य कोऽवकाशं मुहूर्तमपि पण्डितो दद्यात्॥***

***मायाशीलः पुरुषो यद्यपि न करोति कञ्चिदपराधम्।***
***सर्प इवाविश्वास्यो भवति तथाप्यात्मदोषहतः॥***

***सर्वविनाशाश्रयिणः सर्वव्यसनैकराजमार्गस्य।***
***लोभस्य को मुखगतः क्षणमपि दुःखान्तरमुपेयात्॥***

***एवं क्रोधो मानो माया लोभश्च दुःखहेतुत्वात्।***
***सत्त्वानां भवसंसारदुर्गमार्गप्रणेतारः॥*** [प्रशमरतिः-२४-३०]

उदितकषायजयोपायोऽयं कषायोदयादर्वागप्यासेवित आत्मानं रक्षतीति ज्ञेयम्॥६९॥

गुणप्राप्तेरुपायान्तरं दर्शयति—

## धर्मोत्तरो योगः॥७०॥ इति।

**धर्मेति।** धर्मोऽनवाप्तावाप्तगुणप्राप्तिरक्षारूपः, स उत्तरो फलं यस्य स तथाभूतो योगः मनोवाक्कायसाध्यः क्रियाव्यापारः। अयं भावः—सर्वस्यापि यतिधर्मव्यापारस्य अनवाप्त-गुणप्राप्तिरवाप्तगुणरक्षा च फलम्। तदुद्दिश्यैव मनोवाक्कायप्रवृत्तीनां विहितत्वेनोपदेशात्। मया विधीयमाना विहितापि प्रवृत्तिः अनवाप्तगुण-प्राप्तिसाधिका अवाप्तगुणरक्षासाधिका च अस्ति नास्ति वेति अन्वेषणीयम्। मया विधीयमानायाः प्रवृत्तेः फलं किं भविष्यतीति आदावेव विचारणीयम्। अन्यच्च एकापि प्रवृत्तिरधर्मसाधिका न स्यादित्येतस्मिन् विषये जागृतेन भाव्यम्। प्रवृत्तेर्फलं धर्मोऽस्ति अन्यद्वेति निरन्तरं परीक्षणाद् आत्मशुद्धिः सुकरा भवतीति॥७०॥

तदेवं धर्मोत्तरो योगः प्रणिधानसाध्य इत्यागतम्, अतः प्रणिधानसिद्ध्यर्थं तच्छुद्ध्यर्थं चोपायं दर्शयति—

**आत्मानुप्रेक्षा॥७१॥** इति।

**आत्मेति।** आत्मा उपयोगलक्षणो जीवः, अनु पश्चाद्भावे प्रेक्षा प्रकर्षेण ईक्षा अवलोकनम्। आत्मनोऽनु**प्रेक्षा आत्मानुप्रेक्षा।** ध्यानसाधनादिना ईक्षितस्यात्मनः पुनरप्यवलोकनम् विचारणमिति यावत्। अयं भावः— यतिधर्मो हि मोक्षस्य प्रधानं साधनम्, साधनं हि साध्यसिद्धौ व्यापारमपेक्षते। प्राप्तेऽपि यतिधर्मे मोक्षप्राप्त्यर्थं आराधनारूपो व्यापार अपेक्षितः। साध्यसिद्धिर्हि व्यापारशक्त्यनुसारिणी भवति। तीव्रे व्यापारे साध्यसिद्धिः शीघ्रा भवति मन्दे च तस्मिन् मन्दा। व्यापारे पुनः शक्तिः कर्तुः चिकीर्षाधीना जायते। तीव्रया इच्छया तीव्रो व्यापारः मन्दया च मन्दः। मोक्षप्राप्त्यर्थमेव यतमानेन यतिना आराधनायाम् इच्छाशक्तिसंवर्धने प्रयसनीयम्। तदर्थमात्मानुप्रेक्षा प्रवर उपाय इति। आत्मनः पात्रतायाः शक्तेश्च विचारः इच्छाशक्तिं संवर्धयति। अतो यतिनेत्थम्भूता आत्मानुप्रेक्षा सदैव कर्तव्या यदुत— मया खलु मोक्षार्थमेव यतिधर्मः स्वीकृतः। कथञ्चिदपि भाग्येन यतिधर्मः प्राप्तः किन्तु मोक्षप्राप्तिरधुनाप्यवशिष्यते। तदर्थमाराधनायामेव सदाप्रमत्तेन स्थेयं मया। ईदृश्या मन्दयाराधनया कथं मम मोक्षः सम्पत्स्यते? यतिधर्मेणानेनाराधितेन किं मम मुक्तिगमनयोग्यतारूपं तथाभव्यत्वं परिपचति? किमहमाराधनाः सर्वाः स्वशक्त्यनुरूपं निर्वहामि शक्तिनिगूहनेन वा? सत्कृतिसाध्या च मुक्तिर्मे कदा भविष्यति? उक्तमपि —

***जो पुव्वरत्तावरत्तकाले संपेहए अप्पगमप्पएणं।***
***किं मे कडं किं च मे किच्चसेसं किं सक्कणिज्जं न समायरामि॥***

***किं मे परो पासइ किं च अप्पा किं वा हं खलिअं म विवज्जयामि।***
***इच्चेव सम्मं अणुसासमाणो अणागयं नो पडिबंध कुज्जा॥***

[दशवैकालिकसूत्रचू. २ गा. १२,१३]

आत्मानुप्रेक्षेयं नैरन्तर्येण क्रियमाणा श्रमणक्रियासु प्रमादमपनयति, दोषान् दूरीकरोति, शैथिल्यमपाकरोति, नैर्बल्यं विघटयति, मुक्तिमार्गगमनौत्सुक्यं चाभिवर्धयति॥७१॥

**उचितप्रतिपत्तिः॥७२॥** इति।

**उचितेति।** उचिता युक्ता शस्ता वा प्रतिपत्तिः प्रवृत्तिः। प्रवृत्तावौचित्यं च प्रमादवर्जनेन गुणपोषकत्वरूपम्। रागद्वेषप्रभवे हि शरीरकर्मणी मुक्तिमार्गगमनप्रतिबन्धके स्तः। अतो यथा यथा रागद्वेषयोर्विलयः स्यात् तथा तथा प्रवर्तनीयम् यतिना। उक्तमपि—

***किं बहुणा इह जह जह रागद्दोसा लहुं विलिज्जंति।***
***तह तह पयट्टियव्वं एसा आणा जिणिंदाणं॥*** [उपदेशरहस्यम्-२०१]

यानि यानि रागद्वेषयोरालम्बनानि तानि तानि संसारस्यालम्बनानि भवन्तीति मत्वा भवभीतो यतिः

गुणपुष्टौ प्रतिबन्धकीभूतौ रागद्वेषौ निरुन्ध्यात्। गुणोपार्जनमेव च मुक्तिमार्गगमनसहायकत्वात् परमं सुखमिति। तच्च सर्वत्रौचित्येन प्रवर्तमानस्यैव भवति। तदुक्तम्—

*नैवास्ति राजराजस्य तत्सुखं नैव देवराजस्य।*
*यत्सुखमिहैव साधोर्लोकव्यापाररहितस्य॥*
*सन्त्यज्य लोकचिन्तामात्मपरिज्ञानचिन्तनेऽभिरतः।*
*जितलोभरोषमदनः सुखमास्ते निर्जरः साधुः॥*[प्रशमरतिः-१२८,१२९]॥७२॥

ननु उचितप्रतिपत्त्या आगन्तुका दोषाः प्रतिबध्यन्ते किन्तु पूर्वानादि-संस्कारवशादुदितानां पुरातनानां तेषां निरोधः कथं साध्यः? इत्यारेकायामाह—

**प्रतिपक्षासेवनम्॥७३॥** इति।

**प्रतिपक्षेति**। प्रतिपक्षो विरोधी प्रक्रमाद् दोषस्य विरोधी गुणः, तस्य आ समन्तात् सेवनम् आश्रयणम्। अयं भावः—दोषाः कर्मोदयात् प्रादुर्भवन्ति। दोषेभ्यो नवानि कर्माणि बध्यन्ते। दोषेषु सत्सु बध्मानकर्मणामनुबन्धोऽप्यशुभो भवति। अतो दोषेभ्य आत्मनो रक्षार्थं यतिना तद्दोषविरोधिनो गुणाः सेवनीयाः। यथा- आसक्तेः प्रतिपक्षो विरक्तिः, भयस्य प्रतिपक्ष एकत्वभावना, रागस्य प्रतिपक्षो भक्तिः, प्रमादस्य प्रतिपक्षो वीर्याचार इत्यादिकं स्वयमूह्यम्। अनियन्त्रिता उपेक्षिता वा दोषाः संसारमभिवर्धयन्ति, मुक्तिं प्रतिबध्नन्ति। मुक्तिसंसाराविव गुणदोषौ परस्परविरोधिनौ। वीतदोषो हि गुणसम्पन्नो मुक्तिमवाप्नोति। दोषाणामुपस्थितौ कस्यापि मुक्तिर्न भूता, न भवति, न भविष्यति च। अतो निजदोषप्रतिपक्षभूतानां गुणानामर्जने महानादरो विधेय इति उपदेशसर्वस्वम्॥७३॥

अथ प्रतिपक्षासेवनं गुणदोषाणां ज्ञानं विना न सम्भवति तयोर्विवेक एव दुर्लक्ष्यः कथं साध्य इति तदुपायं कथयति—

**आज्ञानुस्मृतिः॥७४॥** इति।

**आज्ञेति।** आज्ञा कर्तव्याकर्तव्यबोधकं वाक्यम्, तस्यानुस्मृतिः अनुरूपचिन्तनम्। आज्ञानुसारि यथा भगवतोक्तं तथैव चिन्तनम्, न स्वमनीषिकयेति भावः। गुणप्राप्तिं दोषहानिं चेच्छता यतिना सर्वत्र भगवदाज्ञा स्मरणीया। यतो गुणदोषविवेको भगवदाज्ञाज्ञानैकसाध्यः। न हि भावयतिधर्मपालनं भगवदाज्ञाज्ञानं विना निर्वहति। भगवदाज्ञाज्ञानं च शास्त्राभ्यासमन्तरेण न सम्पद्यत इत्यतो भगवदाज्ञाधिगतौ सर्वसामग्र्येण शास्त्राभ्यासे प्रयत्नातिशयः कार्यः। शास्त्राभ्यासारतिर्हि भगवदाज्ञाबोधाद् वञ्चितो भवति। प्रतिदिनं पदे पदे इत्थमाज्ञानुस्मृतिर्विधातव्या यदुताहं भगवदाज्ञां यथातथं जानामि नवेति? भगवदुक्तं कर्तव्याकर्तव्यबोधं स्मरामि न वेति? एतावत्यपि संयमपर्याये व्यतीते मया कियन्ति शास्त्राण्यधीतानि? कियत्यो गाथाः कण्ठस्थीकृताः? कियान् मम आगमाभ्यासः? भगवदाज्ञाजिज्ञासोः भगवदाज्ञापिपालयिषोरेव यतिधर्माराधनं सफलं भवति

नान्यस्य। भगवदाज्ञानिरपेक्षोऽधीतनवपूर्वोऽपि आत्महितसाधनसमर्थो न भवतीति ज्ञेयम्॥७४॥

अधुना भगवदाज्ञाज्ञानस्य फलमाह—

**समशत्रुमित्रता॥७५॥** इति।

**समेति।** शत्रुश्च मित्रं च शत्रुमित्रे समे शत्रुमित्रे यस्य स समशत्रुमित्रः, तस्य भावः समशत्रुमित्रता। जीवालम्बनयो रागद्वेषयोः तुल्यवृत्तिता। सम्बन्धमात्रान्मुक्त आत्मा यतिर्भवति। तदुक्तम् उत्तराध्ययनेषु —

***संजोगा विप्पमुक्कस्स अणगारस्स भिक्खुणो॥*** इति [उत्तरा.१.१]।

सर्वेभ्यः संयोगेभ्यो विप्रमुक्तस्य यतेः कश्चित् शत्रुर्मित्रं वा, मामकः परो वा, विरोधी समर्थको वा न भवति। प्रकृतिरेवैषा यतेः यत् स शत्रुभिर्मित्रैश्च समं समानभावेन व्यवहरति। यतो जानाति सर्वमिदं भक्तैः कृतं स्वागतादिकं विरोधिभिः कृतं पराभवादिकं च पुण्यपापोदय-विलसितमिति न तत्र मुह्यति विद्वेष्टि वा। सदा भगवदाज्ञामनुस्मरन् साधनायामेव रममाणो यतिर्यतिधर्मनिष्यन्दभूतं समभावमनुभवति। सूत्रमेतद् जीवविषयकौ रागद्वेषावधिकृत्य प्रवृत्तम्, वस्तुविषयकौ रागद्वेषावधिकृत्य त्वग्रे तुल्येत्यादिसूत्रेण स्वयमेव वक्ष्यति सूत्रकृदिति॥७५॥

अथ शान्ते मनस्येव समभावः समुज्जृम्भतीति मनःशान्तिसाधनोपायां सहनशीलतां त्रिभिः सूत्रैराह—

**परिषहजयः॥७६॥** इति।

**परिषहेति।** परितः समन्ततः स्वहेतुभिरुदीरिताः सन्तः सह्यन्त इति परिषहाः, ते च क्षुधादिद्वाविंशतिभेदाः। तेषां जयः क्षुधादिप्रतिकूलवेदनोपनिपाते स्त्री-सत्काराद्यनुकूल-वेदनोपनिपाते च मनःस्थितेरचलनम् इति। ननु कस्मादेते दुःखजनकाः परीषहाः परिषोढव्याः? इति चेत्, सत्त्ववृद्ध्यर्थम्, सत्त्वहीनो धैर्यात् प्रच्यवति, त्यक्तधैर्यो हि चित्तस्यावक्रगमन-परिणामरूपान्मार्गाद् भ्रश्यति। किञ्च, सहनशीलताभावे हीनसत्त्वस्य मनो निर्बलं सञ्जायते। निर्बले मनसि कुतः समाधिसम्भवः? तदुक्तम्—

***मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः॥***

भाष्येऽपि—**इत्येते द्वाविंशतिर्धर्मविघ्नहेतवो यथोक्तं प्रयोजनमभिसन्धाय रागद्वेषौ निहत्य परीषहाः परिषोढव्या भवन्ति।** [तत्त्वार्थाधिगमसूत्रम् ९.८,९]

स्थानाङ्गेऽप्युक्तम्—

***ममं च सम्मं सहमाणस्स जाव [खममाणस्स तितिक्खमाणस्स] अहियासेमाणस्स किं मन्ने कज्जइ? एगंतसो मे णिज्जरा कज्जइ।***

[स्थानाङ्गसूत्रम् ५.१.४०९]

अन्यच्च, दीक्षायाः प्रथमदिनादेव यतिना मोहनीयादिभिः कर्मभिः सह युद्धमारब्धम्। उदयभावं

प्राप्तानि हि कर्माणि रागद्वेषावुत्प्रेरयन्ति। रागद्वेषप्रभावितोऽज्ञानी निर्बलसत्त्वो वा जीवः तत्र विष्ठायां शूकर इव मज्जति। ततश्च नवानि कर्माणि आदत्ते। समभावसाधनार्थमुद्यतो यतिः पुनः प्रतिपक्षभावनया कर्मणामुदयभावं विफलीकुर्वन् निर्जरामेव करोति। सा च तितिक्षया सम्पद्यते। तितिक्षा पुनः धैर्यवशा। धैर्यं च सहनशीलतासाध्यम्। सहनशीलतासिद्ध्यर्थं यतिना परिषहा उदीर्योदीर्य सोढव्याः। तदुक्तम्—

***खुहं पिवासं दुस्सिज्जं, सीउण्हं अरई भयं। अहियासे अव्वहिओ देहे दुक्खं महाफलं॥***

[दशवैकालिकसूत्रम् अ. ८.२७]

अत्र बहु वक्तव्यम्, तच्चोत्तराध्ययनसूत्रादिभ्यो ज्ञेयम्।

## उपसर्गातिसहनम्॥७७॥ इति।

**उपसर्गेति।** उपसर्ग उप सामीप्येन सृज्यन्ते क्रियन्ते देवादिभिरित्युपसर्गः उपद्रव इति। तेषाम् अतिक्रम्य सहनम् अतिसहनम् अधिकसहनमित्यर्थः। दिव्य-मानुष-तिर्यग्योनिजात्म-संवेदनीयभेदाद् उपसर्गाश्चतुर्धा। तत्र देवादिकृता अनुकूलाः प्रतिकूलश्च दिव्यादयः, आत्मसंवेदनीयाः पुनः रोगदुर्घटनादिसमुत्थदेहपीडारूपाः प्रतिकूलाः, ऐन्द्रियकविषयाभिलाष-रूपाश्चानुकूलाः। अतिसहनमिति। अग्लानभावेन उपसर्गाः सोढव्याः। समागतानां तेषां परिहारो न चिन्तनीयः। नोपसर्गानागच्छतो दृष्ट्वा पलायेत न वागतेषु तेषु दैन्यमुपेयादिति भावः। ननूपसर्गपरिषहयोः कः प्रतिविशेषः? इति चेत्, न बाह्यक्रियाकृतः कश्चिद्, अपि तु तितिक्षाकृत-हेतुफलभावरूप इति गृहाण। परिषहा उदीर्योदीर्य सोढव्या उपसर्गाः पुनरागता एव, नोपसर्गाणामुदीरणं कर्तव्यमिति। परिषहजयजन्यतितिक्षया उपसर्गेषु समभावः स्थिरो भवति। एतदेव मनसिकृत्य सूत्रकारोऽप्याह परिषहाणां जयः कर्तव्य उपसर्गाणां च सहनमिति॥७७॥

ननूपसर्गेषु आगतेषु भयमेवोत्पद्यते कुतः तत्सहनमिति शङ्कायामाह—

## सर्वथा भयत्यागः॥७८॥ इति।

**सर्वथेति।** सूत्रार्थः स्पष्टः। भावार्थः पुनरयम्— अकुतोभया हि यतयो भवन्ति। समोहो हि रागाद्युपलिप्तत्वाद् मूर्च्छारूपं बन्धनं चिनोति। मूर्च्छाबद्धस्य हि भयं भवति। मोहालम्बनमुक्तस्य कस्माद् भयम्? मूर्च्छाभावादेव विरक्तो यतिः सकलेभ्यः सांसारिकेभ्यो भयेभ्यो मुक्तो भवति। अविरक्तस्य भयः प्रादुर्भवति, न विरक्तस्य। कृतपापस्य हि भयमुपजायते, निःपापः पुनर्निर्भयो भवति। स मरणादपि न बिभेति। सपापो मरणाद् बिभ्येत विरतपापो यतिस्तु मनागपि मरणान्न बिभेति। उक्तमपि—

***भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयम्,***
***माने दैन्यभयं बले रिपुभयं रूपे जराया भयम्।***
***शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद् भयम्,***
***सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम्॥*** [वैराग्यशतकम्-३२]॥७८॥

**तुल्याश्मकाञ्चनता॥७९॥** इति।

**तुल्येति।** तुल्ये अश्मा पाषाणः स च काञ्चनं सुवर्णं च अश्मकाञ्चने यस्य स तथा तस्य भावः तुल्याश्मकाञ्चनता। वस्तुविषयकौ रागद्वेषावधिकृत्य सूत्रमेतत् प्रवृत्तमिति। अश्मकाञ्चने द्रव्यस्योदाहरणं क्षेत्र-काल-भावानामुपलक्षणम्। क्षेत्रतो वसत्यासनादि, कालतो ग्रीष्मादि, भावतः सरसविरसादि सन्मानापमानादि वा अनुकूलं वा उपतिष्ठेत् प्रतिकूलं वा तत्रापि रागद्वेषौ न कुर्वीत। विगतसुखापेक्षाय विरतदुःखविरोधाय सदा समतासुखाभ्यासे निमग्नाय यतये सर्वथैव रागद्वेषौ न रोचेते। अत एव जगद् यतिं देववत् पूजयति॥७९॥

ननु समभावसाधनाय अनादिकालीनसंस्कारवशाया रागद्वेषप्रवृत्तेर्विघटनमावश्यकम्, रागद्वेषौ च निमित्तमाप्य त्वरितमेवोदयमागच्छन्तीति तयोर्विघटनं कथं कर्तव्यमित्याशङ्कायामाह—

**अभिग्रहग्रहणम्॥८०॥** इति।

**अभिग्रहेति।** अभिग्रहः अभिगृह्यतेऽभ्यासार्थमिति अभिग्रहः प्रतिज्ञाविशेषः, तस्य ग्रहणम्। स च द्रव्यादिभेदाच्चतुर्विधः। तत्र द्रव्यत ओदनादिद्रव्यविषयः, क्षेत्रतः स्वपरग्रामादि विषयः, कालतः पूर्वापराह्णादिविषयः, भावतो दात्रादीनामेव पर्यायविशेषविषयः। यस्मिन् वस्तुनि व्यक्तौ वा रागद्वेषौ प्रजायेते तद्वस्तुविषयकेन तद्व्यक्तिविषयकेनाभिग्रहेण रागद्वेषोदयस्य प्रतिबन्धो भवति प्रतिपक्षभावनया च तयोर्विघटनं भवतीति यतिनाभिग्रहाः सदा ग्राह्याः। अभिग्रहैः संयमबलं वर्धते। यतिधर्मो हि संयमसाधनार्थं वर्तते। प्रतिक्षणमप्रमत्तभावेन पञ्चानां महाव्रतानां रात्रिभोजनविरमणसहितानां निरतिचारं पालनेन संयमः स्वाराधितो भवति। तदुक्तम्—

***अभिग्गहियसिज्जासिणियस्स उच्चाकूइयस्स अट्ठाबंधियस्स मियासणियस्स आयावियस्स समियस्स अभिक्खणं अभिक्खणं पडिलेहणासीलस्स पमज्जणासीलस्स तहा तहा संजमे सुहाराहए भवइ॥*** [कल्पसूत्रम्-२८१]

तदर्थं यथा पञ्चानां महाव्रतानां पञ्च भावनाः, ब्रह्मचर्यस्य नव वृत्तयः, अष्टौ प्रवचनमातरः समितिगुप्तिरूपा संयमस्याङ्गानि सन्ति तथैवाभिग्रहा अपि संयमाङ्गं भवतीत्यपुदिष्टं भगवद्भिरिति॥८०॥

**विधिवत् पालनम्॥८१॥** इति।

**विधीति।** स्पष्टम्। विधिः शास्त्रसन्दर्शितकरणाकरणप्रकारः। पालनं पारनयनम्। अयं भावः— गृहीतानामभिग्रहाणां शास्त्रदृष्ट्या पालनं कर्तव्यम्, न निजमत्या। कीर्त्याद्यर्थं लोकसमक्षं नियमान् गृहीत्वा तेषां पालने शैथिल्यं नोचितम्। पालयितुमशक्यत्वात् भङ्गभयाद्वा अभिग्रहा न गृह्यन्त इति एतदपि अविचारितरमणीयम्, अभिग्रहा हि सत्त्ववृद्ध्यर्थं भवन्ति। सा च प्रयासे कृते भवति, अप्रयतमानस्य तु सुखशीलतया सत्त्वं क्षीयते। भङ्गभयाद् नियमाग्रहणविचारोऽपि भगवदाज्ञानिरपेक्षः। यत उक्तम्—

***अविहिकया वरमकयं, असूइवयणं भणंति सव्वण्णू।***
***अविहिकयम्मि वि थोवं, अकयम्मि य गुरुयगं होइ॥*** [विचारसारप्रकरणम्-८९६]

पञ्चमहाव्रतपालनपरस्य यतेः अभिग्रहपालने सत्त्वं नास्तीति कथं वक्तुं शक्यते? अत्र बहु वक्तव्यम्, तत्तु ग्रन्थविस्तरभयान्नोच्यते॥८१॥

सिद्धे समभावे आत्मोपलब्धौ ध्यानमावश्यकमिति तत्प्रस्तौति—

**यथार्हं ध्यानयोगः॥८२॥** इति।

**यथार्हमिति।** यथार्हं योग्यतामनतिक्रम्य ध्यानस्य वक्ष्यमाणस्य योगः आदरणम्। ध्यानं चैकाग्रसंवित्तिरिति वचनात् तत्त्वचिन्तनात्मकं ध्यानं सिद्ध्यति। प्रथमान्तिमप्रहरयोः क्रियमाणः स्वाध्यायो ध्यानमित्युच्यते। आज्ञापालनं धर्मध्यानं भवति तत्त्वचिन्तनं च शुक्लध्यानमिति। श्रुतज्ञानेनोपलब्धानाम् अर्थानामनुप्रेक्षया अतीन्द्रियार्थविषयकः क्षयोपशम उपजायते। तेन च इलाकुमारादीनामिव प्रियतमाराग-पारवश्येन नटीभूय राजरञ्जनार्थं पौनःपुन्येन वंशाग्रभागे नृत्यतां सन्मुखायां सुरूपकामिन्यामपि अधोमुखस्य मुनेः सन्दर्शनेन जागृतविवेकानां कैवल्यमुत्पद्यते। सोऽयं क्षयोपशमः यथावद्विहितया क्रियया साध्यः। चिन्तनसहिता हि क्रिया ध्यानसाधनं भवति। श्रुतज्ञानं च तत्साधनं चिन्तनाभावे विफलमेव। सूत्रेष्वर्थोपयोगो सूत्रार्थानामात्मनि विनियोगश्च चिन्तनमित्यभिधीयते। स्थानसूत्रार्थालम्बनात्मिका क्रिया तत्रासाधारणं कारणमिति तां विना ध्यानं न सिद्ध्यति, स्थानसूत्रार्थालम्बनैकोपयोगरूपत्वाद् ध्यानस्य। एतेन क्रियामुपेक्ष्य भगवत्समक्षमुपविश्य नेत्रे निमिल्येन्द्रियोपरमं कुर्वाणा मार्गानभिज्ञा मार्गभ्रष्टा वा इति ज्ञेयम्। यतो हि भगवदुक्तः सकलोऽपि योगोऽन्ययोगनिरपेक्षो न भवति। एवं च क्रियामपलप्य ध्यानमेव कुर्वतः, ध्यानं चापलप्य क्रियामाचरतो मिथ्यात्वं भवति। एकस्यापि जिनोक्तयोगस्याश्रद्धा मिथ्यात्वहेतुरिति तत्र तत्र प्रतिपादितत्वात्। क्रियां विना ध्यानं न सिद्ध्यति, ध्यानेन च विना क्रियायामानन्दानुभूतिर्न जायते। पङ्ग्वन्धन्यायेन ज्ञानक्रिययोः सामञ्जस्येनैव फलसिद्धिरुक्ता।

यथार्हमिति योग्यतानुसारेणेति निर्दिशति। सा च शरीर-मनःस्थैर्य-श्रुतसम्पन्नतादिरूपा। इतरयोगाबाधयेत्यपि ज्ञेयम्। आवश्यकक्रिया-तपः-स्वाध्याय-वैयावृत्यादिकम् अभिनिर्वर्त्य ध्यानं साधनीयम्। ध्यानारूढस्येतरयोगविस्मृतिर्न दोषावहा ध्यानार्थं पुनरितरयोगोपेक्षा दोषावहा। आवश्यकक्रियादिषु उत्साहवतो ध्यानं स्वसाध्यसाधकं भवति, नान्यथा। आवश्यकक्रियादीनि गुणश्रेण्या आदिमानि सोपानानि, ध्यानं तु चरमम्। भूमिकां विनैव ध्यानं कुर्वाणा बहवो यतिधर्माद् भ्रष्टा दृश्यन्त इति।

तदेवं भावयतिधर्मसंसाधकं गुणचक्रमुद्दिश्य आसन्ने मृत्यौ यत्कर्तव्यं तदाह—

**अन्ते संलेखना॥८३॥** इति।

**संहननाद्यपेक्षणम्॥८४॥** इति।

**अन्त इति।** अन्ते आसन्ने मरणे, संलेखना संलिख्यन्तेऽपकृष्यन्ते शरीरकषायादयो यया सा संलेखना आगम-प्रसिद्धान्तिमानशनविधिक्रिया। **संहननेति।** सूत्रद्वयम् एकवाक्येन व्याख्येयम्।

संहननम् अस्थिनिचयबन्धजन्यशक्तिविशेषः, आदिपदाद् इन्द्रियावैकल्यादि, तस्य अपेक्षणम् तदबाधाविचारपूर्वकत्वमिति सूत्रार्थः। अयं भावः—संलेखना यतिधर्मस्य परमनिष्यन्दभूता कीर्तिता परममुनिभिः। संयमधर्मस्य प्रथमदिनादेव संलेखनायाः पूर्वसेवा प्रारभ्यते। आजीवनमाराधितस्य यतिधर्मस्य सारभूतां समतामेव सम्प्राप्तुकामो यतिर्भवसमाप्तिसमये आसन्नं मृत्युं दृष्ट्वा आर्तध्यानादिपरिहारार्थं संलेखनां स्वीकरोति। चतुर्थ आरकेऽयमनशनविधिः सुपाल्य आसीत्। अद्यत्वे विहरमाणानां यतीनां तादृशसंहननाद्यभावेन सागारिकमनशनं भवति। तत्साधनार्थं यतिः व्यक्तिषु ममताम्, वस्तुषु रागम्, शरीरे आसक्तिं च परिहृत्यैकान्तेन समाधौ निरतो भवेत्। विशेषोऽत्रत्यः पञ्चवस्तुगाथाभिरेव प्रदर्श्यते।

***संलेहणा इहं खलु, तवकिरिया जिणवरेहिं पण्णत्ता।***
***जं तीए संलिहिज्जइ, देहकसायाइ णिअमेणं॥१३६६॥***

संलेखना इह खलु प्रक्रमे तपःक्रिया विचित्रा जिनवरैः प्रज्ञप्ता। किमित्याह- यद् यस्मात् तया संलिख्यते कृशीक्रियते देहकषायादिबाह्यमान्तरं च नियमेनेति गाथार्थः।

ननु यतीनां सर्वोऽप्याचारो देहकषायादिकृशीकरणात् संलेखनारूप एवेति कथमेषा पृथगुपदिश्यते इत्याशङ्कायामाह—

***ओहेणं सव्व च्चिय, तवकिरिआ जइ वि एरिसी होइ।***
***तह वि अ इमावसिट्ठा, धिप्पइ जा चरिमकालम्मि॥१३६७॥***

ओघेन सामान्येन सर्वैव तपःक्रिया आदित आरभ्य यद्यपीदृशी देहकषायादि-संलेखनात्मिका भवति तथापि चैषा प्रस्तुतावशिष्टा गृह्यते, तपःक्रियया चरमकाले देहत्यागायेति गाथार्थः। एतदेवाह-

***परिवालिऊण विहिणा, गणिमाइपयं जईणमिअमुचिअं।***
***अब्भुज्जओ विहारो, अहवा अब्भुज्जअं मरणं॥१३६८॥***

परिपाल्य विधिना सूत्रोक्तेन गण्यादिपदम् आदिशब्दाद्-उपाध्यायादिपरिग्रहः, यतीनामुचितमिदं चरमकाले यदुताभ्युद्यतो विहारो जिनकल्पादिरूपः, अथवा- अभ्युद्यतं मरणं पादपोपगमनादीति गाथार्थः।

ननु संलेखनायामकृतायां को दोष इति चेत्, अकृतसंलेखनस्य मरणसमये आर्तध्यानादिसम्भावनयासमाधिः स्यात् तत्परिहारार्थं सा क्रियते। उक्तं च—

***देहम्मि असंलिहिए, सहसा धाऊहिं खिज्जमाणेहिं।***
***जायइ अट्टज्झाणं, सरीरिणो चरमकालम्मि॥१५७७॥***

देहे असंलिखिते सति सहसा धातुभिः क्षीयमाणैर्मासादिभिर्जायते आर्तध्यानम्- असमाधिः शरीरिणश्चरमकाले मरणसमय इति गाथार्थः।

***विहिणा उ थोवथोवं, खविज्जमाणेहिं संभवइ णेअं।***
***भवविडविवीअभूअं, इत्थ य जुत्ती इमा णेआ॥१५७८॥***

विधिना तु शास्त्रोक्तेन स्तोकस्तोकं क्षयमाणैर्धातुभिः सम्भवति नैतदार्तध्यानं भवविटपिबीजभूतमेतदत्र युक्तिरियं ज्ञेया संयमे इति गाथार्थः। कथं जय इत्याह-

***सइसुहभावेण तहा, थोवविवक्खत्तणेण णो बाहा।***
***जायइ बलेण महया, थेवस्सारंभभावाओ॥१५७९॥***

सदा शुभभावस्य तथा तेन संलेखनाप्रकारेण स्तोकविपक्षत्वेन हेतुना न बाधा जायते कुत इत्याह- बलेन महता शुभभावेन तेन स्तोकस्य दुःखस्यारम्भभावादिति गाथार्थः।

***उवकमणं पुण एवं, सप्पडिआरं महाबलं णेयं।***
***उचिअणोसंपायण, सइ सुहभावं विसेसेणं॥१५८०॥***

उपक्रमणमेवं धात्वादीनां सप्रतीकारं भूयो बृंहणेन महाबलं ज्ञेयम्, अत्र उचिताज्ञासम्पादनेन सदा शुभभावमुपक्रमणं विशेषेणेति गाथार्थः।

***थोवं उवक्कमिज्जं, बज्झं अब्भिंतरं च एअस्स।***
***जाइ इअ गोअरत्तं, तहा तहा समयभेएणं॥१५८१॥***

स्तोकमुपक्रमणीयम्, बाह्यं मांसादि, आभ्यन्तरं च अशुभपरिणामादि; एतस्योपक्रमेणास्य याति एवं गोचरत्वं संलेखनायाः तथा तथा समयभेदेन-कालभेदेनेति गाथार्थः।

***जुगवं तु खिविज्जंतं, उदग्गभावेण पायसो जीवं।***
***चावइ सुहजोगाओ, बहुगुरुसेण्णं च सुद्दडं ति॥१५८२॥***

युगपत्तु क्षिप्यमाणं तन्मांसादि उदयभावेन प्रचुरतया प्रायशो जीवं, किमित्याह- च्यावयति शुभयोगात् सकाशात्। किमिष किमित्याह- बहुगुरुसैन्यमिव सुभटं च्यावयति जयादिति गाथार्थः।

***उचिए काले एसा, समयम्मि वण्णिआ जिणिंदेहिं।***
***तम्हा तओ अदुट्ठा, विहिआणुट्ठाणओ चेव॥१५६२॥***

उचिते काले-चरमे एषा संलेखना समयेऽपि आगमेऽपि वर्णिता जिनेन्द्रैः। तीर्थकरैर्यस्मात् तस्मात् न दुष्टा एषा। कुत इत्याह-विहितानुष्ठानत एव शास्त्रोक्तत्वादिति गाथार्थः।

**भावसंलेखनायां यत्नः॥८५॥** इति।

**भावेति।** इह द्रव्यभावाभ्यां द्विधा संलेखना। द्रव्यतः शरीरेन्द्रियाणाम् अपकर्षणम्, भावतः कषायाणाम् अपकर्षणम्। तत्र भावसंलेखनायां यत्नः प्रयासः। अयं भावः— मनसः सर्वेषां कषायाणां विसर्जनं कार्यम्।

मनसि कषायाणामुपस्थितिर्यतेः कलङ्कभूता। कथमिव समस्तं संसारं विजहन् यतिः कषायान्न विसृजेत्? उक्तमपि—

***कषायमुक्तिः किल मुक्तिरेव।***

आसन्ने मृत्यौ पुनर्विशेषतः कषायाणां व्युत्सर्जनं करणीयम्। भावसंलेखनायां यतमानो यतिः त्यजति समस्तान् सम्बन्धान्, परिहरति सर्वान् विचारान्, निरुणद्धि सर्वा भावनाः, विस्मरति आत्मानं विहायान्यत्सर्वम्, उन्नयति परिणतिमिति। शुभपरिणतेरेवान्तिमसमये समाधिः प्रादुर्भवति। सा च निरन्तरमाज्ञाभ्यासेनैव सम्पद्यते इति तत्र महानादरो विधेयः। अत्रत्योऽपि विशेषः पञ्चवस्तुगाथाभिः प्रदर्श्यते।

***भावमवि संलिहेई, जिणप्पणीएण झाणजोएणं।***
***भूअत्थभावणाहिं परिवड्ढइ बोहिमूलाइं॥१५९३॥***

भावमप्यान्तरं संलिखति-वशं करोति, जिनभणितेन आगमानुसारेण ध्यानयोगेन धर्मादिना भूतार्थभावनाभिश्च वक्ष्यमाणाभिः परिवर्द्धयति-वृद्धिं नयति बोधिमूलान्य-बद्धकारणानीति गाथार्थः। तत्रैव प्रकमे विधिशेषमाह—

***एत्थ य आहारो खलु, उवलक्खणमेव होइ णायव्वो।***
***वोसिरइ तओ सव्वं, उवउत्तो भावसल्लं पि॥१६८६॥***

अत्र चानशनाधिकारे आहारः खलु परित्यागम् अधिकृत्योपलक्षणमेव भवति ज्ञातव्यः शेषस्यापि वस्तुनः। तथा चाह- व्युत्सृजति परित्यजति असावनशनी सर्वम्, उपयुक्तः सन् भावशल्यमपि सूक्ष्ममिथ्यात्वादीति गाथार्थः॥ किं बहुना -

***अण्णं पिव अप्पाणं, संवेगाइसयाउ चरमकाले।***
***मण्णइ विसुद्धभावो, जो सो आराहओ भणिओ॥१६६०॥***

अन्यमिवात्मानं प्राक्तनाद् आत्मनः संवेगातिशयात् संवेगातिशयेन चरमकाले प्राणप्रयाणकाले मन्यते शुद्धभावः सन् सर्वासदभिनिवेशत्यागेन यः स आराधको भणितः तीर्थकरगणधरैरिति गाथार्थः। अयमेव विशिष्यते -

***सव्वत्थापडिबद्धो, मज्झत्थो जीविए अ मरणे अ।***
***चरणपरिणामजुत्तो, जो सो आराहओ भणिओ॥१६६१॥***

सर्वत्राप्रतिबद्धः इहलोके परलोके च, तथा मध्यस्थो जीविते मरणे च; न मरणमभिलषति नापि जीवितमित्यर्थः, चरणपरिणामयुक्तो न तद्विकलः, य एवम्भूतः स आराधको भणितः तीर्थकरगणधरैरिति गाथार्थः। अस्यैव फलमाह -

*सो तप्पभावओ च्चिअ, खविउं तं पुव्वदुक्कडं कम्मं।*
*जायइ विसुद्धजम्मा, जोग्गो अ पुणो वि चरणस्स॥१६६२॥*

स एवम्भूतः तत्प्रभावत एव चारित्रपरिणामप्रभावादेव क्षपयित्वाऽभावमापाद्य तत्पूर्वदुष्कृतं कर्म शीतलविहारजं जायते विशुद्धजन्मा जात्यादिदोषरहितः योग्यश्च पुनरपि तज्जन्मापेक्षया चरणस्येति गाथार्थः॥८५॥

**विशुद्धं ब्रह्मचर्यम्॥८६॥** इति।

**विशुद्धमिति।** विशेषतः शुद्धं विशुद्धम्, विशेषोऽत्र सूक्ष्मातिचारालोचनादिरूपः। बृंहति वर्धते ज्ञानादिनेति ब्रह्म आत्मा तस्मिन् चरणं रमणं ब्रह्मचर्यम् आत्मरमणतेति। यद्वा ज्ञान-दर्शन-चारित्ररूपेषु आत्मगुणेषु स्थैर्यम् ब्रह्मचर्यम्। ब्रह्मचर्ये विशुद्धिः पुनः शरीरममतात्यागेन ज्ञान-दर्शन-चारित्रैः सम्पूर्णात्मरमणतासाधनरूपा। तेषामेव क्षपकश्रेण्यारोहणद्वारा अविलम्बेन मुक्तिसाधकत्वात्। ब्रह्मचर्यपदस्य उपस्थनिरोधार्थकत्वे त्वयमर्थः— अन्तिमसमये प्राप्ते यतिना विशेषतो ब्रह्मचर्यस्य विशुद्धिः कर्तव्या। वेदोदयस्य तीव्ररागादिजन्यत्वेन निबिडकर्म-बन्धहेतुत्वात्। उपलक्षणं चैतत् पञ्चानामपि महाव्रतानाम्। ब्रह्मचर्यस्य साक्षादुपादानं तु तस्य दुर्धरत्वप्रदर्शनार्थमिति॥८६॥

**विधिना देहत्याग इति ॥८७॥** इति।

**विधिनेति। विधिना** मरणसमाध्यातुरप्रत्याख्यान-महाप्रत्याख्यान-प्रकीर्णकाद्युक्तेन देहः शरीरं तस्य त्यागः परिहारः। अयं भावः— शरीरात्मनः संयोगस्तावत् जन्म इत्युच्यते, प्रकृतशरीरविरहः पुनर्मृत्युरिति। मृत्योरनन्तरं कर्मवशादात्मा पुनर्नवं शरीरमुपादत्ते। शरीरे आसक्ताः तत्त्यागानिप्सवो अत एव मृत्योर्भीता जन्तवो मृत्योरनन्तरं नीचगतिं यान्ति। शरीरेऽप्यनासक्ता जीवनमोह-विमुक्ताः अत एव मृत्योरभीताः आराधनासन्तुष्टा अखण्डितसमाधिभावाः धर्मे रममाणा यतयस्तु शरीरं त्यक्त्वा म्रियन्त इति सद्गतिमेव यान्ति।

ननु यतीनां देहत्यागोऽनुचितः, तस्य आत्महत्यारूपत्वात्। आत्महत्यापरिणामस्य सङ्क्लेशरूपत्वेन समताविरोधित्वात्, आगमेषु आत्मातिपातक्रियाया अपि अनिष्टफलकत्व-प्रतिपादनादिति चेत्, न, प्रमाद-योगाभावेन समाधिपूर्वकत्वात् देहत्यागस्य हिंसारूपत्वाभावात्, आत्महत्याया पुनः प्रमादपूर्वकत्वाद् आर्तध्यानसहितत्वाच्च हिंसैकरूपत्वात्। तदुक्तम्—

*प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा॥* [तत्त्वार्थाधिगमसूत्रम्-७.८]

अत एव नास्मिन् सङ्क्लेशलेशगन्धोऽपि प्रत्युत धर्मध्यानपूर्वकतया परमसमाधिसाधकत्वादायत्यां शुभफलकत्वमेव। समानत्वेन दृश्यमानायामपि क्रियायां परिणामभेदादाशयभेदाच्च फलभेदो भवतीति देहत्यागात्महत्ययोः सादृश्य-कल्पनमत्यन्तमनुचितम्। देहत्यागे दृश्यमानस्य दुःखस्य तु इष्टोत्पत्तिनान्तरीयकत्वेन बलवदनिष्टानुबन्धित्वाभावान्न अनिष्टफलकत्वमिति। आत्महत्याया बलवदनिष्टानुबन्धित्वं प्रतीतिसिद्धमेवेति यत्किञ्चिदेतत्। एतेन तपसोऽपि स्वपीडारूपत्वात् सङ्क्लेशरूपत्वेन

हिंसारूपत्वमिति, असाध्यव्याधिपीडितस्य इच्छामृत्युवरणे न हिंसेति, रोगप्रसारकानां श्वादीनां वधे न हिंसेति च तथागत महात्मगान्धिप्रभृतीनां पण्डितम्मन्यानां मतमपहस्तितम्। एतत् सर्वमपि पञ्चवस्तुप्रकरणोक्तम् अत्रोपन्यस्यते। तथा हि—

*आहप्पवहणिमित्तं, एसा कह जुज्जई जइजणस्स।*
*समभावविर्त्तिण्णो तह, समयत्थविरोहओ चेव॥१५८३॥*

आह- आत्मवधनिमित्तमेषा संलेखना कथं युज्यते?, यतिजनस्य समभाववृत्तेः सतः, तथा समतार्थविरोधतश्चैवेति गाथार्थः। विरोधमाह-

*तिविहातिवायकिरिया, अप्पपरोभयगया जओ भणिया।*
*बहुसो अणिट्ठफलया, धीरेहि अणंतनाणीहिं॥१५८४॥*

त्रिविधा अतिपातक्रिया, कथमित्याह- आत्मपरोभयगता यतो भणिता समये बहुशोऽनिष्टफलदेयं क्रिया धीरैरनन्तज्ञानिभिः सर्वज्ञैरिति गाथार्थः।

*भण्णइ सच्चं एअं, ण उ एसा अप्पवहणिमित्तंति।*
*तल्लक्खणविरहाओ, विहिआणुट्ठाणभावेणं॥१५८५॥*

भण्यते सत्यमेतत् त्रिविधातिपातक्रियेति, न त्वेषा संलेखना क्रिया आत्मवधनिमित्तेति। कुत इत्याह- तल्लक्षणविरहात्- आत्मवधक्रियालक्षणविरहात्, विरहश्च विहितानुष्ठानभावेन हेतुनेति गाथार्थः।

*जा खलु पमत्तजोगा, णिअमा रागाइदोससंसत्ता।*
*आणाउ बहिब्भूआ, सा होइ अइवायकिरिआ य॥१५८६॥*

या खलु प्रमत्तयोगात् सकाशात् नियमाद्रागादिदोषसंसक्ता स्वरूपतः आज्ञातो बहिर्भूता उञ्छात्मा सा भवत्यतिपातक्रिया इदं लक्षणमस्या इति गाथार्थः।

*जा पुण एअविउत्ता, सुहभावविवड्ढिणी अ नियमेणं।*
*सा होइ सुद्धकिरिया, तल्लक्खणजोगओ चेव॥१५८७॥*

या पुनरेतद्वियुक्ता क्रिया शुभभावविवर्द्धिनी च नियमेन अवश्यतया सा भवति शुद्धक्रिया कुतः? तल्लक्षणयोगत एवेति गाथार्थः।

*पडिवज्जइ अ इमं जो, पायं किअकिच्चिमो उ इह जम्मे।*
*सुहमरणा कियकिच्चो, तस्सेसा जायइ जहुत्ता॥१५८८॥*

प्रतिपद्यते चैनां संलेखनक्रियां यः प्रायः स कृतकृत्य एवेह जन्मनि निष्ठितार्थः शुभमरणेनात्र कृतकृत्यो यदि परं तस्यैषा जायते यथोक्ता संलेखना शुद्धक्रिया चेति गाथार्थः।

*मरणपडिआरभूआ, एसा एवं च ण मरणनिमित्ता।*
*जह गंडछेअकिरिआ, णो आयविराहणारूवा॥१५८९॥*

मरणप्रतीकारभूतैषा एवं चोक्तन्यायान्न मरणनिमित्ता, यथा गण्डच्छेदक्रिया दुःखरूपापि नात्मविराधनारूपेति गाथार्थः।

संलेखनाविधिः पुनर्यत्यन्तिमाराधनायामेवमुक्तः - ***तत्रास्यां यत्याराधनायां षडधिकारा ज्ञेयाः। तथाहि- पूर्वं सम्यक्त्वशुद्धिः[१] ततोऽष्टादशपापस्थानकपरिहारः [२] ततः चतुरशीतिलक्षजीवयोनिक्षामणम् [३] संयमविराधनाया दुष्कृतदानं [४] ततो दुष्कृतगर्हा [५] ततः सुकृतानुमोदना [६]।*** [यत्यन्तिमाराधना]

प्रथम सूत्रसमाप्तौ द्वितीय इतिशब्दोऽधिकारसमाप्तौ ॥८७॥

सापेक्षयतिधर्मनिरूपणं समाप्तमधुनावसरसङ्गत्या निरपेक्षयतिधर्मं वर्णयति—

**निरपेक्षयतिधर्मस्तु॥८८॥** इति।

**निरपेक्षेति।** अधिकारसूत्रं स्पष्टम्॥८८॥

**वचनगुरुता॥८९॥** इति।

**वचनेति।** वचनं भगवदुपदेशः। तदेव गुरुः प्रवर्तकनिवर्तकं यस्य स वचनगुरुः तस्य भावः तत्ता। अनेनास्य इच्छादिषु योगेषु शास्त्रयोगाराधकत्वं गच्छानपेक्षित्वं चोक्तमिति॥८९॥

**अल्पोपधित्वम्॥९०॥** इति।

**निष्प्रतिकर्मशरीरता॥९१॥** इति।

**अल्प इति।** सूत्रद्वयं स्पष्टम्।

ननु व्याध्यादावुपस्थितेऽप्ययं समाध्यर्थं चिकित्सां किमिति नादरति? इति जिज्ञासायामाह—

**अपवादत्यागः॥९२॥** इति।

तथा च शास्त्रयोगाराधकस्य उत्सर्गप्रधानत्वेनापवादमार्गनिषेधात्। दृढसंहनन-धृतिबलादिसम्पन्नस्यैव जिनकल्पोपदेशादिति॥९२॥

**नियतकालचरिता॥९४॥** इति।

**प्राय ऊर्ध्वस्थानम्॥९५॥** इति।

**नियतेति।** सूत्रद्वयं स्पष्टम्।

**देशनायामप्रबन्धः॥९६॥** इति।

**देशनेति।** देशना धर्मोपदेशः अप्रबन्धः अनाग्रहः, देशनां न ददातीति यावत्।

**सदाप्रमत्तता॥९७॥** इति।

**ध्यानैकतानत्वमिति॥९८॥** इति।

सदेति। सूत्रद्वयं स्पष्टम्।

**सम्यग् यतित्वमाराध्य महात्मानो यथोदितम्।**
**सम्प्राप्नुवन्ति कल्याणमिहलोके परत्र च॥५.४॥** इति।

**क्षीराश्रवादिलब्ध्यौघमासाद्य परमाक्षयम्।**
**कुर्वन्ति भव्यसत्त्वानामुपकारमनुत्तमम्॥५.५॥** इति।

**मुच्यन्ते चाशु संसारादत्यन्तमसमञ्जसात्।**
**जन्म-मृत्यु-जरा-व्याधि-रोग-शोकाद्युपद्रुतात्॥५.६॥ इति।**

सम्यगित्यादि। सम्यग् अतिचाररहितं भावयतित्वमिति भावः। अनेन भावरहितेन मेरुपर्वतप्रमाणरजोहरणराशिसङ्ख्येन वेषमात्ररूपेण क्रियामात्ररूपेण वा कायक्लेशात्मकेन द्रव्ययतित्वेनानन्तशो गृहीतेनापि न निस्तार इत्यावेदितम्। उक्तमपि—

***संसारसागरमिमं, परिब्भमंतेहिं सव्वजीवेहिं।***
***गहियाणि य मुक्काणि य, अणंतसो दव्वलिंगाइं॥*** [उपदेशमाला-५२१]

सुगमम् अन्यदिति।

तदेवं मनुजभव-जिनशासन-यतिवेषादिरूपामुत्तमां सामग्रीमवाप्य सूरिपुरन्दराणामिमं हितोपदेशं मनसि निधाय निरतिचारचारित्रपालने लब्धलक्ष्या यतय आत्मानमुद्धरेयुरिति शुभमभिलषति श्रीमदात्म-कमल-वीर-दान-प्रेमसूरीश्वर-चरणचञ्चरीको विजयरामचन्द्रसूरिरिति।

**॥इति श्रीमदात्म-कमल-वीर-दान-प्रेमसूरीश्वरचरणचञ्चरीक**
**विजयरामचन्द्रसूर्युपदिष्टा**
**सङ्गत्याख्या धर्मबिन्दुपञ्चमाध्यायवृत्तिः समाप्ता॥**

# परिशिष्टाणि

## परिशिष्टं प्रथमम्

(१)

### सूरिपुरन्दराचार्यश्रीहरिभद्रसूरिविरचितः

# ॥धर्मबिन्दुः॥

**[सूरिपुरन्दराचार्यश्रीहरिभद्रसूरिविरचितविवृतिवृत्तिसहितः पञ्चमाध्यायः]**

**॥अथ पञ्चमोऽध्यायः॥**

व्याख्यातश्चतुर्थोऽध्यायः, अथ पञ्चमो व्याख्यायते, तस्य चेदमादिसूत्रम्—

**बाहुभ्यां दुस्तरो यद्वत् क्रूरनक्रो महोदधिः।**
**यतित्वं दुष्करं तद्वादित्याहुस्तत्त्ववेदिनः॥२५॥** इति।

**बाहुभ्यां** भुजाभ्यां **दुस्तरः** कृच्छ्रेण तरीतुं शक्यः **यद्वदिति** दृष्टान्तार्थः, **क्रूरनक्रः, क्रूरा** भीषणा **नक्रा** जलजन्तुविशेषा उपलक्षणत्वात् मत्स्य-मकर-सुसुमारादयश्च यत्र स तथा, **महोदधिः** महासमुद्रः, **यतित्वं** श्रामण्यं **दुष्करं** दुरनुष्ठेयं **तद्वदिति** दार्ष्टान्तिकार्थः, **इत्येतदाहुः** उक्तवन्तः, के इत्याह— **तत्त्ववेदिनः** प्रव्रज्यापरमार्थज्ञातार इति॥१॥

अस्यैव दुष्करत्वे हेतुमाह—

**अपवर्गः फलं यस्य जन्म-मृत्य्वादिवर्जितः।**
**परमानन्दरूपश्च दुष्करं तन्न चाद्भुतम्॥२६॥** इति।

**अपवर्गो** मोक्षः **फलं** कार्यं **यस्य** यतित्वस्य **जन्म-मृत्य्वादिवर्जितः** जन्म-मरण-जरादिसंसारविकारविरहितः, तथा **परमानन्दरूपः** सर्वोपमातीतानन्दस्वभावः, चकारो विशेषणसमुच्चये, **दुष्करं** कृच्छ्रेण कर्तुं शक्यं **तत्,** यतित्वम्, **न च नैवाद्भुतम्** आश्चर्यमेतत्, अत्यन्तमहोदयानां विद्या-मन्त्रौषधादिसाधनानामिहैव दुष्करत्वोपलम्भात् इति॥२॥

एवं तर्हि कथमतिदुष्करं यतित्वं कर्तुं शक्यं स्यादित्याशङ्कयाह—

**भवस्वरूपविज्ञानात्तद्विरागाच्च तत्त्वतः।**
**अपवर्गानुरागाच्च स्यादेतन्नान्यथा क्वचित्॥२७॥** इति।

**भवस्वरूपस्य** इन्द्रजाल-मृगतृष्णिका-गन्धर्वनगर-स्वप्नादिकल्पस्य **विज्ञानात्** सम्यक्श्रुतलोचनेन अवलोकनात् प्राक्, तदनु **तद्विरागात् तप्तलोहपदन्यासोद्विजनन्यायेन** भवस्वरूपोद्वेगात्, चकारो हेत्वन्तर-समुच्चये, **तत्त्वतः** निर्व्याजवृत्त्या, तथा **अपवर्गानुरागात्** परमपदस्पृहातिरेकात्, **चशब्दः** प्राग्वत्, **स्याद्**

भवे**देतद्** यतित्वम्, **नान्यथा** नान्यप्रकारेण **क्वचित्** क्षेत्रे काले वा, सम्यगुपायमन्तरेणोपेयस्य कदाचिद् अभावादिति॥३॥

**इत्युक्तो यतिः,**
**अधुनास्य धर्ममनुवर्णयिष्यामः, यतिधर्मो द्विविधः—**
**सापेक्षयतिधर्मो निरपेक्षयतिधर्मश्च॥१॥२७०॥**इति।

प्रतीतार्थमेव, परं गुरु-गच्छादिसाहाय्यमपेक्षमाणो यः प्रव्रज्यां परिपालयति स सापेक्षः, इतरस्तु निरपेक्षो यतिः, तयोर्धर्मोऽनुक्रमेण गच्छवासलक्षणो जिनकल्पादिलक्षणश्चेति॥१॥

**तत्र सापेक्षयतिधर्मः॥२॥२७१॥**इति।

**तत्र** तयोः **सापेक्ष**-निरपेक्षयतिधर्मयोर्मध्यात् सापेक्षयतिधर्मोऽयं भण्यते॥२॥

यथा—

**गुर्वन्तेवासिता॥३॥२७२॥** इति।

**गुरोः** प्रव्राजकाचार्यस्य **अन्तेवासिता** शिष्यभावः यावज्जीवमनुष्ठेया, तच्छिष्यभावस्य महाफलत्वात्, पठ्यते च—

***नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य।***
***धण्णा आवकहाए गुरुकुलवासं न मुंचंति॥*** [बृहत्कल्पभाष्ये ५७१३]

तथा—

**तद्भक्ति-बहुमानौ॥४॥२७३॥** इति।

**तस्मिन्** गुरौ **भक्तिः** समुचितान्नपानादिनिवेदनपादप्रक्षालनादिरूपा बहुमानश्च भावप्रतिबन्धः॥५॥

तथा—

**सदाज्ञाकरणम्॥५॥२७४॥** इति।

**सदा** सर्वकालम् अह्नि रात्रौ चेत्यर्थः **आज्ञायाः** गुरूपदिष्टस्वरूपायाः करणम्॥६॥

तथा—

**विधिना प्रवृत्तिः॥६॥२७५॥** इति।

**विधिना** शास्त्रोक्तेन **प्रवृत्तिः** प्रत्युपेक्षणा-प्रमार्जना-भिक्षाचर्यादिषु साधुसमाचारेषु व्यापारणम्॥६॥

तथा—

**आत्मानुग्रहचिन्तनम्॥७॥२७६॥** इति।

क्वचिदप्यर्थे गुर्वाज्ञायाम् **आत्मानुग्रहस्य** उपकारस्य **चिन्तनं** विमर्शनम्, यथा—

***धन्यस्योपरि निपतत्यहितसमाचरणधर्मनिर्वापी।***
***गुरुवदनमलयनिसृतो वचनसरसचन्दनस्पर्शः॥*** [प्रशम.७०] इति।

तथा—

**व्रतपरिणामरक्षा॥८॥२७७॥** इति।

**व्रतपरिणामस्य** चारित्रलक्षणस्य तत्तदुपसर्ग-परीषहादिषु स्वभावत एव व्रतबाधाविधायिषु सत्सु **रक्षा** चिन्तामणिमहौषध्यादिरक्षणोदाहरणेन परिपालना विधेया॥८॥

तथा—

**आरम्भत्यागः॥९॥२७८॥** इति।

**आरम्भस्य** षट्कायोपमर्दरूपस्य **त्यागः**॥९॥

एतदुपायमेवाह—

**पृथिव्याद्यसङ्घट्टनम्॥१०॥२७९॥** इति।

**पृथिव्यादीनां** जीवनिकायानाम् **असङ्घट्टनम्, सङ्कट्टनं** स्पर्शनम्, तत्प्रतिषेधादसङ्घट्टनम्, उपलक्षणत्वादगाढगाढपरितापनापद्रावणानां च परिहार इति॥१०॥

तथा—

**त्रिधेर्याशुद्धिः॥११॥२८०॥** इति।

**त्रिधा** ऊर्ध्वाधस्तिर्यग्दिगपेक्षया ईर्यायाः चङ्क्रमणस्य **शुद्धिः** युगमात्रादिदृष्टिनिवेश-रूपा॥११॥

तथा—

**भिक्षाभोजनम्॥१२॥२८१॥** इति।

इह त्रिधा भिक्षा सर्वसम्पत्करी पौरुषघ्नी वृत्तिभिक्षा चेति। तल्लक्षणं चेदम्—

***यतिर्ध्यानादियुक्तो यो गुर्वाज्ञायां व्यवस्थितः। सदानारम्भिणस्तस्य सर्वसम्पत्करी मता॥१६१॥***
***वृद्धाद्यर्थमसङ्गस्य भ्रमरोपमयाटतः। गृहि-देहोपकाराय विहितेति शुभाशयात्॥१६२॥***
***प्रव्रज्यां प्रतिपन्नो यस्तद्विरोधेन वर्तते। असदारम्भिणस्तस्य पौरुषघ्नी प्रकीर्तिता॥१६३॥***

[हा.अष्टके ५/२, ३,४]

*निःस्वान्धपङ्गवो ये तु, न शक्ता वै क्रियान्तरे। भिक्षामटन्ति वृत्त्यर्थं वृत्तिभिक्षेयमुच्यते ॥१६४॥*

[हा.अष्टके५/६]

**ततो भिक्षया** प्रस्तावात् सर्वसम्पत्करीलक्षणया पिण्डमुत्पाद्य **भोजनं** विधेयमिति॥१२॥

तथा—

**आघाताद्यदृष्टिः॥१३॥२८२॥** इति।

**आघात्यन्ते** हिंस्यन्ते जीवा अस्मिन्निति **आघातः** सूनादिस्थानम्, **आदि**शब्दात् द्यूत-खलादिशेषप्रमादस्थानग्रहः, ततः आघातादेर**दृष्टिः** अनवलोकनं कार्यम्, तदवलोकने हि अनादिभवाभ्यस्ततया प्रमादानां तत्कौतुकात् कोपादिदोषप्रसङ्गात् इति॥१३॥

तथा—

**तत्कथाश्रवणम्॥१४॥२८३॥** इति।

**तेषाम्** आघातादीनां कथायाः परैरपि कथ्यमानायाः **अश्रवणम्** अनाकर्णनम्, तच्छ्रवणेऽपि दोषः प्राग्वत्॥१४॥

तथा—

**अरक्तद्विष्टता॥१५॥२८४॥** इति।

सर्वत्र प्रियकारि**ण्यरक्तेन** अरागवता तदितरस्मिं**श्चाद्विष्टेन** अद्वेषवता भाव्यम्, यतः पठ्यते—

*राग-द्वेषौ यदि स्यातां तपसा किं प्रयोजनम्?॥१५॥* [ ] इति।

तथा—

**ग्लानादिप्रतिपत्तिः॥१६॥२८५॥** इति।

**ग्लानो** ज्वरादिरोगातुरः, **आदिशब्दाद्** बाल-वृद्ध-बहुश्रुत-प्राघूर्णकादिग्रहः, तेषां **प्रतिपत्तिः** समुचितान्न-पानादिसम्पादनरूपम्, वैयावृत्त्यम्, महाफलत्वात्तस्य, पठ्यते च—

*पडिभग्गस्स मयस्स व नासइ चरणं सुअं अगुणणाए।*
*नो वेयावच्चचियं सुहोदयं नासई कम्मं॥* [ओघनि.५३५]

तथा—

*जह भमर-महुअरिगणा निवयंती कुसुमियम्मि वणसंडे।*
*इय होइ निवइयव्वं गेलण्णे कइयवजढेण॥१६७॥* [निशीथभाष्ये २९७१]१६॥

तथा—

**परोद्वेगाहेतुता॥१७॥२८६॥** इति।

**परेषाम्** आत्मव्यतिरिक्तानां स्वपक्षगतानां परपक्षगतानां च गृहस्थ-पाषण्डिरूपाणा**मुद्वेगस्य** अप्रीतिरूपस्या**हेतुता** अहेतुभावः, यथोक्तम्—

*धम्मत्थमुज्जएणं सव्वस्सापत्तियं न कायव्वं।*
*इय संजमो वि सेओ एत्थ य भयवं उदाहरणं॥१६८॥*
*सो तावसासमाओ तेसिं अप्पत्तियं मुणेऊणं।*
*परमं अबोहिबीअं तओ गओ हंतअकाले वि ॥१६९॥*
*इय अन्नेण वि सम्मं सक्कं अप्पत्तियं सइ जणस्स।*
*नियमा परिहरियव्वं इयरम्मि सतत्तचिंता उ॥१७०॥*

[पञ्च.१११४-५-६ पञ्चा.७।१४-१६]

**इयरम्मि सतत्तचिंता उ** इतरस्मिन् अशक्यप्रतीकारेऽप्रीतिके **स्वतत्त्वस्य** स्वापराधरूपस्य चिन्ता कार्या, यथा-

*ममैवायं दोषो यदपरभवे नार्जितमहो शुभं यस्माल्लोको भवति मयकि प्रीतहृदयः।*
*अपापस्यैवं मे कथमपरथा मत्सरमयं जनो याति स्वार्थं प्रति विमुखतामेत्य सहसा?॥* [ ]

एतदेवाह—

**भावतः प्रयत्नः॥१८॥२८७॥** इति।

**भावतः** चित्तपरिणामलक्षणात् **प्रयत्नः** परोद्वेगाहेतुतायामुद्यमः कार्यः इति, अयमत्र भावः— यदि कथञ्चित् तथाविधप्रघट्टकवैषम्यात् कायतो वचनतो वा न परोद्वेगहेतुभावः परिहर्तुं पार्यते तदा भावतोऽरुचिलक्षणात् परोद्वेगं परिहर्तुं यत्नः कार्यः, भावस्यैव फलं प्रति अवन्ध्यहेतुत्वात्।

उक्तञ्च—

*अभिसन्धेः फलं भिन्नमनुष्ठाने समेऽपि हि।*
*परमोऽतः स एवेह वारीव कृषिकर्मणि॥* [योगदृष्टि.११८] इति॥१८॥

तथा—

**अशक्ये बहिश्चारः॥१९॥२८८॥** इति।

**अशक्ये** कुतोऽपि वैगुण्यात् समाचरितुमपार्यमाणे तपोविशेषादौ क्वचिदनुष्ठाने **बहिश्चारो** बहिर्भावलक्षणः तस्मात् कार्यः, अशक्यं नारब्धव्यमित्यर्थः, अशक्यारम्भस्य क्लेशैकफलत्वेन साध्यसिद्धेरनङ्गत्वात्॥१९॥

तथा—

**अस्थानाभाषणाम्॥२०॥२८९॥** इति।

**अस्थाने** भाषितोपयोगायोग्यत्वेनाप्रस्तावे **अभाषणं** कस्यचित् कार्यस्याभणनम्, एवमेव साधोर्भाषासमितत्वशुद्धिः स्यादिति॥२०॥

तथा—

**स्खलितप्रतिपत्तिः॥२१॥२९०॥** इति।

कुतोऽपि तथाविधप्रमाददोषात् **स्खलितस्य** क्वचिन्मूलगुणादावाचारविशेषे स्खलनस्य विराधनालक्षणस्य जातस्य **प्रतिपत्तिः** स्वतः परेण वा प्रेरितस्य सतोऽभ्युपगमः तत्रोदितप्रायश्चित्ताङ्गीकारेण कार्यः, स्खलितकालदोषाद् अनन्तगुणत्वेन दारुणपरिणामत्वात् तदप्रतिपत्तेः, अत एवोक्तम्—

***उप्पण्णा उप्पण्णा माया अणुमग्गओ निहंतव्वा।***
***आलोअणनिंदणगरिहणाहि न पुणो वि बीयं ति ॥*** [पञ्चव.४६४]

***अणायारं परक्कम्म नेव गूहे न निण्हवे।***
***सुई सया वियडभावे असंसत्ते जिइंदिए॥*** [दशवै.८।३२]**॥२१॥**

तथा—

**पारुष्यपरित्यागः॥२॥२९१॥** इति।

**पारुष्यस्य** तीव्रकोपकषायोदयविशेषात् परुषभावलक्षणस्य तथाविधभाषणादेः स्वपक्षपरपक्षाभ्यामसम्बन्धयोग्यताहेतोः **परित्यागः** कार्यः, अपारुष्यरूपविश्वासमूलत्वात् सर्वसिद्धीनाम्, यदुच्यते—

***सिद्धेर्विश्वासिता मूलं यद्यूथपतयो गजाः।***
***सिंहो मृगाधिपत्येऽपि न मृगैरनुगम्यते॥ [ ] ॥२२॥*** इति।

**सर्वत्रापिशुनता॥२३॥२९२॥** इति।

**सर्वत्र** स्वपक्षे परपक्षे च परोक्षं दोषाणामनाविष्करणम्, परदोषग्राहितायां हि आत्मैव दोषवान् कृतः स्यात्, पठ्यते च—

***लोको परस्स दोसे हत्थाहत्थिं गुणे य गिण्हंतो।***
***अप्पाणमप्पणो च्चिय कुणइ सदोसं च सगुणं च॥ [ ] ॥२३॥***

तथा—

**विकथावर्जनम्॥२४॥२९३॥** इति।

**विकथानां** स्त्री-भक्त-देश-राजगोचराणां स्वभावत एवाकुशलाशयसमुन्मीलन-निबन्धनानां **वर्जनम्,** एतत्कथाकरणे हि कृष्ण-नीलाद्युपाधिरिव स्फटिकमणिरात्मा कथ्यमानस्त्र्यादिचेष्टानामनुरूपतां प्रतिपद्यते॥२४॥

तथा—

**उपयोगप्रधानता॥२५॥२९४॥** इति।

**उपयोगः प्रधानं** पुरस्सरः सर्वकार्येषु यस्य स तथा, तस्य भावस्तता विधेया, निरुपयोगानुष्ठानस्य द्रव्यानुष्ठानत्वात्, ***अनुपयोगो***[१] ***द्रव्यम्*** [ ] इति वचनात्॥२५॥

तथा—

**निश्चितहितोक्तिः॥२६॥२९५॥** इति।

निश्चितस्य संशय-विपर्यया-नध्यवसायबोधदोषपरिहारेण निर्णीतस्य हितस्य च परिणामसुन्दरस्योक्तिः भाषणम्, अत एव पठ्यते—

***कुदृष्टं कुश्रुतं चैव कुज्ञातं कुपरीक्षितम्।***
***कुभावजनकं सन्तो भाषन्ते न कदाचन॥*** **[ ]॥२६॥**

**प्रतिपन्नानुपेक्षा॥२७॥२९६॥** इति।

**प्रतिपन्नस्य** अभ्युपगतस्य गुरुविनयस्वाध्यायादेः साधुसमाचारविशेष**स्यानुपेक्षा** अनवधीरणा, अवधीरितो हि समाचारो जन्मान्तरेऽपि दुर्लभः स्यात्॥२७॥

तथा—

**असत्प्रलापाश्रुतिः॥२८॥२९७॥** इति।

**असतां** खलप्रकृतीनां **प्रलापा** अनर्थकवचनरूपा असत्प्रलापाः तेषा**मश्रुतिः** अनवधारणम्, श्रुतिकार्यद्वेषाकरणेन अनुग्रहचिन्तनेन च, यथोक्तम्—

***निराकारिष्णुर्यदि नोपलभ्यते भविष्यति क्षान्तिरनाश्रया कथम्?।***
***यदाश्रयात् क्षान्तिफलं मयाप्यते स सत्कृतिं कामिव नाम नार्हति॥१७८॥*** **[ ]॥२८॥**

तथा—

**अभिनिवेशत्यागः॥२९॥२९८॥** इति।

**अभिनिवेशस्य** मिथ्याग्रहरूपस्याप्रज्ञापनीयतामूलबीजस्य सर्वकार्येषु **त्याग** इति॥२९॥

---

१ "अणुवओगो दव्वमिति कट्टु" इति अनुयोगद्वारसूत्रे, सू.१४,४८२,५६१॥

तथा—

**अनुचिताग्रहणम्॥३०॥२९९॥** इति।

**अनुचितस्य** साधुजनाचारबाधाविधायितयायोग्यस्य अशुद्धपिण्ड-शय्या-वस्त्रादेर्धर्मोपकरणस्य बाल-वृद्ध-नपुंसकादेश्चाप्रव्राजनीयस्य **अग्रहणम्** अनुपादानं कार्यमिति। यथोक्तम्—

***पिडं सेज्जं च वत्थं च चउत्थं पायमेव य।***
***अकप्पियं न इच्छेज्जा पडिगाहेज्ज कप्पियं॥*** [ दशवै.६/४७]

***अट्ठारस पुरिसेसुं वीसं इत्थीसु दस नपुंसेसु।***
***पव्वावणाअणरिहा पन्नता वीयरागेहिं॥***

ते चामी—

***बाले वुड्ढे नपुंसे य जड्डे कीवे य वाहिए।***
***तेणे रायावगारी य उम्मत्ते य अदंसणे॥***

***दासे दुट्ठे य मूढे य अणत्ते जुंगिए इ य।***
***ओबद्धए य भयगे सेहनिप्फेडिया इ य॥१८२॥***

***गुव्विणी बालवच्छा य पव्वावेउं न कप्पइ॥१८३॥*** [निशीथ.   ] त्ति॥

तथा—

**पंडे कीवे वाइय कुंभी ईसालु सउणी य।**
**तक्कम्मसेवि पक्खियमपक्खिए तह सुगंधि आसित्ते॥** [निशीथ.    ] त्ति।

एतत्स्वरूपं च निशीथाध्ययनात् ज्ञातव्यम्॥३०॥

तथा—

**उचिते अनुज्ञापना॥३१॥३००॥** इति।

**उचिते** अनुचितविलक्षणे पिण्डादौ **अनुज्ञापना** अनुजानतोऽनुमन्यमानस्य स्वयमेव गुरोस्तद्द्रव्यस्वामिनो वा प्रयोजनम्, यथा- अनुजानीत यूयं मम ग्रहीतुमेतदिति, अन्यथा अदत्तादानप्रसङ्गात्॥३१॥

तथा—

**निमित्तोपयोगः॥३२॥३०१॥** इति।

**निमित्ते** उचिताहारादेर्ग्रहीतुमभिलषितस्य शुद्ध्यशुद्धिसूचके शकुने उपयोगकारणे साधुजनप्रसिद्धे, प्रवृत्ते सति गम्यते, **उपयोगः** आभोगः कार्यः, अत्र च निमित्ताशुद्धौ चैत्यवन्दनादिकुशलक्रियापूर्वकं

निमित्तान्तरमन्वेषणीयम्, एवं यदा त्रीन् वारान् निमित्तशुद्धिर्न स्यात् तदा तद्दिने न तेन किञ्चिद् ग्राह्यम्, यदि परमन्यानीतं भोक्तव्यमिति॥३२॥

निमित्तशुद्धावपि—

**अयोग्येऽग्रहणम्॥३३॥३०२॥** इति।

**अयोग्ये** उपकाराकारकत्वेनानुचिते पिण्डादाव**ग्रहणम्** अनुपादानं कार्यमिति॥३३॥

तथा—

**अन्ययोग्यस्य ग्रहः॥३४॥३०३॥** इति।

**अन्यस्य** आत्मव्यतिरिक्तस्य गुरु-ग्लान-बालादेः यद् **योग्यम्** उपष्टम्भकत्वेनोचितं तस्य ग्रहो विधेय इति॥३४॥

एवं च गृहीतस्य किं कार्यमित्याह—

**गुरोर्निवेदनम्॥३५॥३०४॥** इति।

हस्तशताद् बहिर्गृहीतस्येर्याप्रतिक्रमणगमनागमनालोचनापूर्वकं हस्तशतमध्ये तु एवमेव **गुरोः निवेदनं** दायकहस्तमात्रव्यापारप्रकाशनेन लब्धस्य ज्ञापनं समर्पणं च कार्यमिति॥३५॥

अत एव—

**स्वयमदानम् ॥३६॥३०५॥** इति।

**स्वयम्** आत्म**नादानं** लब्धस्यान्यस्मै अवितरणम्, गुर्वायत्तीकृतत्वात् तस्य॥३६॥

ततो यदि गुरुः स्वयमेव कस्मैचित् बालादिकाय किञ्चिद् दद्यात् तत् सुन्दरमेव, अथ कुतोऽपि व्यग्रतया न स्वयं ददाति किन्तु तेनैव दापयति तदा—

**तदाज्ञया प्रवृत्तिः॥३७॥३०६॥** इति।

**तस्य** गुरो**राज्ञया** निरोपेण **प्रवृत्ति**र्दाने कार्या॥३७॥

तत्र च—

**उचितच्छन्दनम्॥३८॥३०७॥** इति।

**उचितस्य** समानसम्भोगस्य बालादेः साधोः, न पुनरन्यस्य, तं प्रति दानानधिकारितत्वात् तस्य, छन्दनं छन्दस्य अभिलाषस्य अन्नादिग्रहणं प्रत्युत्पादनं कार्यम्॥३८॥

ततो दत्तावशिष्टस्यान्नादेः—

**धर्मायोपभोगः॥३९॥३०८॥** इति।

**धर्माय** धर्माधारशरीरसन्धारणद्वारेण धर्मार्थमेव च, न पुनः शरीरवर्णबलाद्यर्थमपि, **उपभोगः** उपजीवनम्, तथा चार्षम्—

*वेयण वेयावच्चे इरियट्ठाए य संयमट्ठाए।*
*तह पाणवत्तियाए छट्ठं पुण धम्मचिंताए॥* [उत्तरा. २६।३३] ॥३९॥

तथा—

**विविक्तवसतिसेवा॥४०॥३०९॥** इति।

**विविक्तायाः** स्त्री-पशु-पण्डकविवर्जितायाः **वसतेः** आश्रयस्य **सेवा** परिभोगो विधेयः, अविविक्तायां हि वसतौ व्रतिनां ब्रह्मचर्यव्रतविलोपप्रसङ्ग इति॥४०॥ अत एव ब्रह्मचर्यव्रतपरिपालनाय एतच्छेषगुप्तीरभिधातुं '**स्त्रीकथापरिहारः**' इत्यादि '**विभूषापरिवर्जनम्**' इतिपर्यन्तं सूत्राष्टकमाह।

तत्र—

**स्त्रीकथापरिहारः॥४१॥३१०॥** इति।

स्त्रीणां कथा **स्त्रीकथा**, सा च चतुर्विधा- जातिकुलरूपनेपथ्यभेदात्, तत्र जातिः ब्राह्मणादिका, तत्कथा यथा—

*धिक् ब्राह्मणीर्धवाभावे या जीवन्ति मृता इव।*
*धन्याः शूद्रीर्जने मन्ये पतिलक्षेऽप्यनिन्दिताः॥* [ ]

कुलं चौलुक्य-चाहुमानादि, तत्कथा—

*अहो चौलुक्यपुत्रीणां साहसं जगतोऽधिकम्।*
*विशन्त्यग्नौ मृते पत्यौ याः प्रेमरहिता अपि॥* [ ]

**रूपं** शरीराकारः, तत्कथा—

*अहो अन्ध्रपुरन्ध्रीणां रूपं जगति वर्ण्यते।*
*यत्र यूनां दृशो लग्ना न मन्यन्ते परिश्रमम्॥* [ ]

**नेपथ्यं** वस्त्रादिवेषग्रहः, तत्कथा—

*धिग् नारीरौदीच्या बहुवस्त्राच्छादिताङ्गलतिकत्वात्।*
*यद्यौवनं न यूनां चक्षुर्मोदाय भवति सदा॥* [ ] तस्याः परिहार इति॥४१॥

**निषद्यानुपवेशनम्॥४२॥३११॥** इति।

**निषद्यायां** स्त्रीनिवेशस्थाने पट्ट-पीठादौ मुहूर्त्तं यावत् स्त्रीषूत्थितास्वपि **अनुपवेशनं** कार्यम्, सद्य एव

स्त्रीनिषद्योपवेशने साधेस्तच्छरीरसंयोगसङ्क्रान्तोष्मस्पर्शवशेन मनोविश्रोतसिकादोषसम्भवात्॥४२॥

**इन्द्रियाप्रयोगः॥४३॥३१२॥** इति।

**इन्द्रियाणां** चक्षुरादीनां कथञ्चिद् विषयभावापन्नेष्वपि गुह्योरु-वदन-कक्षा-स्तनादिषु स्त्रीशरीरावयवेषु **अप्रयोगः** अव्यापारणं कार्यम्, पुनस्तन्निरीक्षणाद्यर्थं न यत्नः कार्यः॥४३॥

**कुड्यान्तरदाम्पत्यवर्जनम्॥४४॥३१३॥** इति।

**कुड्यं** भित्तिस्त**दन्तरं** व्यवधानं यस्य तत् तथा, दाम्पत्यं दयिता-पतिलक्षणं युगलम्, कुड्यान्तरं च तद् दाम्पत्यं चेति समासः, तस्य **वर्जनम्,** वसतौ स्वाध्यायस्थानादौ च न तत्र स्थातव्यं यत्र कुड्यान्तरं दाम्पत्यं भवतीति॥४४॥

**पूर्वक्रीडितास्मृतिः॥४५॥३१४॥** इति।

**पूर्वं** प्रव्रज्याप्रतिपत्तिकालात् प्राक् **क्रीडितानां** प्रौढप्रमोदप्रदप्रमदाप्रसङ्गप्रभृतिविलसितानाम**स्मृतिः** अस्मरणम्, अयं च भुक्तभोगान् प्रत्युपदेश इति॥४५॥

**प्रणीताभोजनम्॥४६॥३१५॥** इति।

**प्रणीतस्य** अतिस्निग्धस्य गलत्स्नेहबिन्दुलक्षणस्याहार**स्याभोजनम्** अनुपजीवनमिति॥४६॥

**अतिमात्राभोगः॥४७॥३१६॥** इति।

अप्रणीतस्याप्याहार**स्यातिमात्रस्य** द्वात्रिंशत्कवलादिशास्त्रसिद्धप्रमाणातिक्रान्त**स्याभोगः** अभोजनम्॥४७॥

**विभूषापरिवर्जनम्॥४८॥३१७॥** इति।

**विभूषायाः** शरीरोपकरणयोः शृङ्गारलक्षणायाः **परिवर्जनमि**ति। एतेषां च स्त्रीकथादीनां नवानामपि भावानां मोहोद्रेकहेतुत्वात् निषेधः कृत इति॥४८॥

तथा—

**तत्त्वाभिनिवेशः॥४९॥३१८॥** इति।

**तत्त्वे** सम्यग्दर्शन-ज्ञान-चारित्रानुसारिणि क्रियाकलापे **अभिनिवेशः** शक्यकोटिमागते कर्तुमत्यन्तादरपरता, अन्यथा तु मनःप्रतिबन्ध एव कार्यः॥४९॥

तथा—

**युक्तोपधिधारणा॥५०॥३१९॥** इति।

**युक्तस्य** शास्त्रप्रसिद्धप्रमाणसमन्वितस्य लोकपरिवादाविषयस्य स्वपरयो रागानुत्पादकस्य **उपधेः** वस्त्रपात्रादिलक्षणस्य **धारणा** उपभोगः, उपलक्षणत्वात् परिभोगश्च गृह्यते, यथोक्तम्—

***धारणया उवभोगो परिहरणा होइ परिभोगो॥१९०॥***

[बृहत्कल्पभाष्ये २३६७, २३७२] ॥५०॥

तथा—

**मूर्च्छात्यागः॥५१॥३२०॥** इति।

**मूर्च्छाया** अभिष्वङ्गस्य सर्वत्र बाह्येऽर्थेऽभ्यन्तरे च शरीरबलादौ वर्जनम्॥५१॥

तथा—

**अप्रतिबद्धविहरणम्॥५२॥३२१॥** इति।

**अप्रतिबद्धेन** देश-ग्राम-कुलादावमूर्च्छितेन **विहरणं** विहारः कार्यः॥५२॥

तथा—

**परकृतबिलवासः॥५३॥३२२॥** इति।

**परैः** आत्मव्यतिरिक्तैः **कृते** स्वार्थमेव निष्पादिते **बिल** इव बिले असंस्करणीयतया उपाश्रये वासः॥५३॥

तथा—

**अवग्रहशुद्धिः॥५४॥३२३॥** इति।

**अवग्रहाणां** देवेन्द्र-राज-गृहपति-शय्यातर-साधर्मिकाभाव्यभूभागलक्षणानां शुद्धिः तदनुज्ञया परिभोगलक्षणा कार्या॥५४॥

**मासादिकल्पः॥५५॥३२४॥** इति।

**मासः** प्रतीतरूप एव, **आदि**शब्दाच्चतुर्मासी गृह्यते, ततो मासकल्पश्चतुर्मासीकल्पश्च कार्यः॥५५॥

यदा तु दुर्भिक्ष-क्षितिपतिविग्रह-जङ्घाबलक्षयादिभिर्निमित्तैः क्षेत्रविभागेन मासादिकल्पः कर्तुं न पार्यते तदा किं कर्तव्यमित्याह—

**एकत्रैव तत्क्रिया॥५६॥३२५॥** इति।

**एकस्मिन्नेव** मासकल्पादियोग्ये क्षेत्रे वसत्यन्तरविभागेन वीथ्यन्तरविभागेन च सर्वथा निरवकाशतायां

संस्तारकभूमिपरिवर्तेन **तत्क्रिया** मासादिकल्पक्रियेति, अत एव पठ्यते—

***संथारपरावत्तं अभिग्गहं चेव चित्तरूवं तु।***
***एत्तो चरित्तिणो इह विहार-पडिमाइसु करंति॥ [ ]***॥५६॥

तत्र च—

**सर्वत्राममत्वम्॥५७॥३२६॥** इति।

**सर्वत्र** पीठफलादौ नित्यवासोपयोगिनि अन्यस्मिंश्च**ाममत्वम्** अममीकार इति॥५७॥

तथा—

**निदानपरिहारः॥५८॥३२७॥** इति।

नितरां दीयते लूयते सम्यग्दर्शनप्रपञ्चबहलमूलजालो ज्ञानादिविषयविशुद्धविनयविधिसमुद्धुरस्कन्धबन्धो विहितावदातदानादि-भेदशाखोपशाखाचितो निरतिशयसुरनरभवप्रभवसुखसम्पत्ति-प्रसूनाकीर्णोऽनभ्यर्णीकृत-निखिलव्यसनव्यालकुलशिवालयशर्मफलोल्बणो धर्मकल्पतरुरनेन सुरर्द्ध्याद्याशंसनपरिणाम-परशुनेति निदानं तस्य परिहारः, अत्यन्तदारुणपरिणामत्वात् तस्य, यथोक्तम्—

***यः पालयित्वा चरणं विशुद्धं करोति भोगादिनिदानमज्ञः।***
***ही वर्धयित्वा फलदानदक्षं स नन्दनं भस्मयते वराकः ॥१८८॥ [ ] इति॥५८॥***

तर्हि किं कर्तव्यमित्याह—

**विहितमिति प्रवृत्तिः॥५९॥३२८॥** इति।

**विहितं** कर्तव्यतया भगवता निरूपितमेत**दिति** एवं सर्वत्र धर्मकार्ये **प्रवृत्तिः**॥५९॥

तथा—

**विधिना स्वाध्याययोगः॥६०॥३२९॥** इति।

**विधिना** काल-विनयाद्याराधनरूपेण **स्वाध्यायस्य** वाचनादे**र्योगो** व्यापारणमिति॥६०॥

तथा—

**आवश्यकापरिहाणिः॥६१॥३३०॥** इति।

**आवश्यकानां** स्वकाले नियमात् कर्तव्यविशेषाणां प्रत्युपेक्षणादीनां **अपरिहाणिः** अभ्रंशः, इयं च प्रधानं साधुलिङ्गम्, तथा च **दशवैकालिकनिर्युक्तिः**—

***संवेगो निव्वेओ विसयविवेगो सुसीलसंसग्गी।***
***आराहणा तवो नाणदंसणचरित्तविणओ य॥***

*खंती य मद्दवऽज्जव विमुत्तयाऽदीणया तितिक्खा य।*
*आवस्सगपरिसुद्धी य भिक्खुलिंगाइं एयाइं॥* [दश.नि.३४८-३४९]

तथा—

**यथाशक्ति तपःसेवनम्॥६२॥३३१॥** इति।

**यथाशक्ति तपसः** अनशनादेः **सेवनम्** आचरणम्, यथोक्तम्—

*कायो न केवलमयं परितापनीयो मिष्टै रसैर्बहुविधैर्न च लालनीयः।*
*चित्तेन्द्रियाणि न चरन्ति यथोत्पथेन वश्यानि येन च तदाचरितं जिनानाम्॥१९४॥* [ ] ॥६२॥

तथा—

**परानुग्रहक्रिया॥६३॥३३२॥** इति।

**परेषां** स्वपक्षगतानां परपक्षगतानां च जन्तूनां महत्या करुणापरायणपरिणामितया **अनुग्रहकरणं** ज्ञानाद्युपकारसम्पादनमिति॥६३॥

तथा—

**गुणदोषनिरूपणम्॥६४॥३३३॥** इति।

सर्वत्र विहारादौ कर्तव्ये **गुणदोषयोर्निरूपणं** कार्यम्॥६४॥

तथा—

**बहुगुणे प्रवृत्तिः॥६५॥३३४॥** इति।

यद् **बहुगुणम्** उपलक्षणत्वात् केवलगुणमयं वा कार्यमाभासते तत्र **प्रवर्ति(वृत्ति)तव्यम्,** नान्यथेति॥६५॥

तथा—

**क्षान्तिर्मार्दवमार्जवमलोभता॥६६॥३३५॥** इति।

एते **क्षान्त्यादयश्च**त्वारोऽपि कषायचतुष्टयप्रतिपक्षभूताः साधुधर्ममूलभूमिकास्वरूपाः नित्यं कार्या इति॥६६॥

अत एव—

**क्रोधाद्यनुदयः॥६७॥३३६॥** इति।

**क्रोधादीनां** चतुर्णां कषायाणा**मनुदयो** मूलत एवानुत्थानम्॥६७॥

तथा—

**वैफल्यकरणम्॥६८॥३३७॥** इति।

**वैफल्यस्य** विफलभावस्य कथञ्चिदुदयप्राप्तानामपि क्रोधादीनां **करणम्,** क्रोधादीनामुदये यच्चिन्तितं कार्यं तस्याकरणेन क्रोधाद्युदयो निष्फलः कार्य इति भावः, एवं च कृते पूर्वोक्ताः क्षान्तादय आसेविता भवन्ति॥६८॥

क्रोधाद्यनुदयार्थिना च यत् कार्यं तदाह—

**विपाकचिन्ता॥६९॥३३८॥** इति।

**विपाकस्य** क्रोधादिकषायफलस्य **चिन्ता** विमर्शो विधेयः, यथा—

***क्रोधात् प्रीतिविनाशं मानाद् विनयोपघातमाप्नोति।***
***शाठ्यात् प्रत्ययहानिं सर्वगुणविनाशनं लोभात्॥*** [प्रशम.२५] इति ॥६९॥

तथा—

**धर्मोत्तरो योगः॥७०॥३३९॥** इति।

**धर्मोत्तरो** धर्मफलः सर्व एव **योगो** व्यापारो विधेयः, न पुनरट्टट्टहास-केलिकिलत्वादिः पापफल इति॥७०॥

तथा—

**आत्मानुप्रेक्षा॥७१॥३४०॥** इति।

आत्मनः **स्वस्य अनुप्रेक्षा** पर्यालोचना भावप्रत्युपेक्षारूपा, यथा—

***किं कयं किं वा सेसं किं करणिज्जं तवं च न करेमि।***
***पुव्वावरत्तकाले जागरओ भावपडिलेहा॥*** [ओघनि.२६३] त्ति।

एवमात्मन्यनुप्रेक्षिते यत् कृत्यं तदाह—

**उचितप्रतिपत्तिः॥७२॥३४१॥** इति।

**उचितस्य** गुणबृंहकस्य प्रमादनिग्राहिणश्चानुष्ठानस्य **प्रतिपत्तिः** अभ्युपगम इति॥७२॥

तथा—

**प्रतिपक्षासेवनम्॥७३॥३४२॥** इति।

यो हि यदा येन दोषेण बाध्यमानो भवति तेन तदा तत्**प्रतिपक्ष**भूतस्य गुण**स्यासेवनं** कार्यम्,

हिमपातपीडितेनेवाग्नेरिति॥७३॥

तथा—

**आज्ञानुस्मृतिः॥७४॥३४३॥** इति।

**आज्ञाया** भगवद्वचनस्य पदे पदे हृदयेऽनुस्मृतिः कार्या, भवगद्वचनानुस्मरणस्य भगवत्स्मरणरूपत्वेन महागुणत्वात्, यदुक्तम्—

***अस्मिन् हृदयस्थे सति हृदयस्थस्तत्त्वतो मुनीन्द्र इति।***
***हृदयस्थिते च तस्मिन् नियमात्सर्वार्थसंसिद्धिः॥१९७॥*** [षोड.२।१४] इति।

तथा—

**समशत्रु-मित्रता॥७५॥३४४॥** इति।

**शत्रौ मित्रे** च **समान**परिणामता, एको हि तत्र निर्भर्त्सनादिभिरन्यस्तु स्तुति-वन्दनादिभिः स्वचित्तसन्तोषं घटयन्तौ मां निमित्तमात्रमवलम्ब्य प्रवृत्तौ द्वावपि, न तु मत्कार्यं किञ्चनेति, ततः कोऽनयोरूनोऽधिको वा ममेति भावनया॥७५॥

तथा—

**परीषहजयः॥७६॥३४५॥** इति।

**परीषहाणां** क्षुत्पिपासादीनां द्वाविंशतेरपि जयः अभिभवः, तत्र दर्शनपरीषहस्य मार्गाच्यवनार्थं शेषाणां च कर्मनिर्जरार्थं कार्य इति, यथोक्तम्—***मार्गाच्यवन-निर्जरार्थं परिषोढव्याः परीषहाः।*** [तत्त्वा.९/८] इति ॥७६॥

तथा—

**उपसर्गातिसहनम्॥७७॥३४६॥** इति।

उपसृज्यन्ते पीडापरिगतैर्वेद्यन्ते ये ते **उपसर्गाः**, ते च दिव्य-मानुष-तैरश्चा-ऽऽत्मसंवेदनीयभेदाच्चतुर्धा, तेषा**मतिसहनम् अभिभवनम्,** अन्यथा व्यसनमयत्वेन संसारस्य तेषामनतिसहने मूढमतित्वप्रसङ्गात्, यथोक्तम्—

***संसारवर्त्यपि समुद्विजते विपद्भयो यो नाम मूढमनसां प्रथमः स नूनम्।***
***अम्भोनिधौ निपतितेन शरीरभाजा संसृज्यतां किमपरं सलिलं विहाय॥*** [ ] इति।

तथा—

**सर्वथा भयत्यागः॥७८॥३४७॥** इति।

**सर्वथा** सर्वैः प्रकारैरिहलोक-परलोकभयादिभि**र्भयस्य** भीतेस्त्यागः परित्यागः, निरतिचारयतिसमाचार वशोपलब्धसमुत्कृष्टोपष्टम्भतया मृत्योरपि नोद्विजितव्यम्, किं पुनरन्यभयस्थानेभ्य इति, अत एवोक्तमन्यत्र—

***प्रायेणाकृतकृत्यत्वान्मृत्योरुद्विजते जनः।***
***कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्॥*** [ ] ॥७८॥

तथा—

**तुल्याश्म-काञ्चनता॥७९॥३४८॥** इति।

**तुल्ये** समाने अभिष्वङ्गाविषयतया **अश्म-काञ्चने** उपल-सुवर्णे यस्य स तथा, तद्भावस्तत्ता॥७९॥

तथा—

**अभिग्रहग्रहणम्॥८०॥३४९॥** इति।

**अभिग्रहाणां** द्रव्य-क्षेत्र-काल-भावभेदभिन्नानाम्

***लेवडमलेवडं वा अमुगं दव्वं च अज्ज घेच्छामि।***
***अमुगेण व दव्वेण व अह दव्वाभिग्गहो एस॥*** **[पञ्च.२९८]**

इत्यादिशास्त्रसिद्धानां **ग्रहणम्** अभ्युपगमः कार्यः॥८०॥

तथा—

**विधिवत् पालनम्॥८१॥३५०॥** इति।

**विधिवद्** विधियुक्तं यथा भवति, **पालनम**भिग्रहाणामिति॥८१॥

तथा—

**यथार्हं ध्यानयोगः॥८२॥३५१॥** इति।

**यथार्हं** यो यस्य योग्यस्तदनतिक्रमेण **ध्यानयोगो** ध्यानयोर्धर्म(र्म्य)शुक्ललक्षणयोर्योगः, अथवा यथार्हमिति यो देशः कालो वा ध्यानस्य योग्यस्तदनुल्लङ्घनेनेति॥८२॥

तथा—

**अन्ते संलेखना॥८३॥३५२॥** इति।

**अन्ते** आयुःपर्यन्ते विज्ञाते सति **संलेखना** शरीर-कषाययोस्तपोविशेष-भावनाभ्यां कृशीकरणम्॥८३॥

परमत्र—

**संहननाद्यपेक्षणम्॥८४॥३५३॥** इति।

**संहननस्य** शरीरसामर्थ्यलक्षणस्य **आदि**शब्दात् चित्तवृत्तेः सहायसम्पत्तेश्च **अपेक्षणम्** आश्रयणं कार्यम्, संहननाद्यपेक्ष्य संलेखना विधेयेति भाव इति॥८४॥

नन्वनयोर्द्रव्यसंलेखना-भावसंलेखनयोः कात्यन्तमादरणीयेत्याह—

**भावसंलेखनायां यत्नः॥८५॥३५४॥** इति।

**भावसंलेखनायां** कषायेन्द्रियविकारतुच्छीकरणरुपायां **यत्नः** आदरः कार्यः, द्रव्यसंलेखनाया अपि भावसंलेखनार्थमुपदेशात्, अयमत्र भावः- इह मुमुक्षुणा भिक्षुणा प्रत्यहं मरणकालपरिज्ञानयत्नपरेण स्थयेम्, मरणकालपरिज्ञानोपायाश्च आगम-देवतावचन-सुप्रतिभा-तथाविधानिष्टस्वप्नदर्शनादयोऽनेके शास्त्र-लोकप्रसिद्धा इति, ततो विज्ञाते मरणकाले पूर्वमेव द्वादश वर्षाणि यावदुत्सर्गतः संलेखना कार्या, तत्र च—

***चत्तारि विचित्ताइं विगईनिज्जूहियाइं चत्तारि।***
***संवच्छरे य दोण्णि उ एगंतरियं च आयामं॥***
***नाइविगिट्ठो य तवो छम्मासे परिमियं य आयामं।***
***अन्ने वि य छम्मासे होइ विगिट्ठं तवोकम्मं॥***
***वासं कोडीसहियं आयामं काउमाणुपुव्वीए।***
***गिरिकंदरं तु गंतुं पायवगमणं अह करेइ॥*** [पञ्च.१५७४-५-६]

यदा तु कुतोऽपि संहननादिवैगुण्यान्न शक्यते इयान् संलेखनकालः साधयितुं तदा मासवर्षपरिहाण्या जघन्यतोऽपि षण्मासान् यावत् संलेखना कार्या, असंलिखितशरीरकषायो हि भिक्षुरनशनमधिष्ठितः सहसा धातुक्षये समुपस्थिते न सुगतिफलं तथाविधं समाधिमाराधयितुं साधीयान् स्यादिति॥८५॥

तथा—

**विशुद्धं ब्रह्मचर्यम्॥१८॥२५५॥** इति।

**विशेषेण** अतिनिबिडब्रह्मचर्यगुप्तिविधानरूपेण **शुद्धं ब्रह्मचर्यं** प्रतीतमेव विधेयम्, यदत्र संलेखनाधिकारे विशुद्धब्रह्मचर्योपदेशनं तद्वेदोदयस्य क्षीणशरीरतायामपि अत्यन्तदुर्धरत्व-ख्यापनार्थमिति॥८६॥

अथ संलेखनानन्तरं आशुघातके वा विष-विशूचिकादौ दोषे सति यद्विधेयं तदाह—

**विधिना देहत्याग इति॥८७॥३५६॥** इति।

**विधिना** आलोचन-व्रतोच्चार-परक्षामणानशन-शुभभावना-पञ्चपरमेष्ठिस्मरणलक्षणेन **देहस्य त्यागः** परित्यजनम्, पण्डितमरणाराधनमित्यर्थः, इतिशब्दः परिसमाप्तौ, इत्युक्तः सापेक्षयतिधर्मः॥८७॥

अथ द्वितीयधर्मप्रस्तावनायाह—

**निरपेक्षयतिधर्मस्तु॥८८॥३५७॥** इति।

**निरपेक्षयतीनां धर्मः** पुनरयं वक्ष्यमाणः॥८८॥

तमेवाह—

**वचनगुरुता॥८९॥३५८॥** इति।

**वचन**मेव आगम एव **गुरुः** सर्वप्रवृत्तौ निवृत्तौ चोपदेशकत्वेन यस्य स तथा, तद्भावस्तत्ता॥८९॥

तथा—

**अल्पोपधित्वम्॥९०॥३५९॥** इति।

**अल्पः** स्थविरापेक्षया **उपधिः** वस्त्र-पात्रादिरूपो यस्य स तथा, तद्भावस्तत्त्वम्, उपाधिप्रमाणं च विशेषशास्त्रादवसेयम्॥९०॥

तथा—

**निष्प्रतिकर्मशरीरता॥९१॥३६०॥** इति।

**निष्प्रतिकर्म** तथाविधग्लानाद्यवस्थायामपि प्रतीकारविरहितं **शरीरं** यस्य स तथा, तद्भावस्तत्त्वम् ॥९१॥

अत एव—

**अपवादत्यागः॥९२॥३६१॥** इति।

**अपवादस्य** उत्सर्गापेक्षयापकृष्टवादस्य **त्यागः** कार्यः, न हि निरपेक्षो यतिः सापेक्षयतिरिव उत्सर्गासिद्धावपवादमपि समालम्ब्य अल्पदोषं बहुगुणं च कार्यमारभते किन्तूत्सर्गपथप्राप्तं केवलगुणमयमेवेति॥९२॥

तथा—

**ग्रामैकरात्रादिविहरणम्॥९३॥३६२॥** इति।

**ग्रामे** प्रतीतरूपे उपलक्षणत्वान्नगरादौ च एका चासौ रात्रिश्चेत्येकरात्रः, **आदि**शब्दात् द्विरात्रस्य मासकल्पस्य च ग्रहः, तेन **विहरणम्,** किमुक्तं भवति? यदा प्रतिमाकल्परूपो निरपेक्षो यतिधर्मः प्रतिपन्नो भवति तदा ऋतुबद्धे काले ग्रामे ज्ञातः सन् स एकरात्रम् अज्ञातश्च एकरात्रं द्विरात्रं वा वसति, यथोक्तम्-

***ना एगरायवासी एगं व दुगं व अन्नाए।*** [पञ्चा.१८/८]

जिनकल्पिक-यथालन्दकल्पिक-शुद्धपरिहारिका ज्ञाता अज्ञाताश्च मासमिति॥९३॥

तथा—

**नियतकालचरिता॥९४॥३६३॥** इति।

**नियते** तृतीयपौरुषीलक्षणे **काले** भिक्षाद्यर्थं सञ्चरणम्, यथोक्तम्—

***भिक्खा पंथो य तइयाए॥*** [बृहत्कल्पभाष्ये गा.१४१४, १४३०] इति।

तथा—

**प्राय ऊर्ध्वस्थानम्॥९५॥३६४॥** इति।

**प्रायो** बाहुल्येन **ऊर्ध्वस्थानं** कायोत्सर्गः॥९५॥

तथा—

**देशनायामप्रबन्धः॥९६॥३६५॥** इति।

**देशनायां** धर्मकथारूपायां धर्मं श्रोतुमुपस्थितेष्वपि तथाविधप्राणिषु **अप्रबन्धः** अभूरिभावः, ***एगवयणं दुवयणं वा*** [ ] इति वचनप्रामाण्यात्॥९६॥

तथा—

**सदाप्रमत्तता॥९७॥३६६॥** इति।

**सदा** दिवा रात्रौ **चाप्रमत्तता** निद्रादिप्रमादपरिहारः॥९७॥

तथा—

**ध्यानैकतानत्वमिति॥९८॥३६७॥** इति।

**ध्याने** धर्मध्यानादा**वेक** एव **तानः** चित्तप्रसर्पणरूपो यस्य स तथा, तद्भावस्तत्त्वम्, **इति**शब्दः समाप्तौ॥

अथोपसञ्जिहीर्षुराह—

**सम्यग् यतित्वमाराध्य महात्मानो यथोदितम्।**
**सम्प्राप्नुवन्ति कल्याणमिहलोके परत्र च॥२८॥** इति।

**सम्यग् यतित्वम्** उक्तरूप**माराध्य** समासेव्य **महात्मानो** जना **यथोदितं** यथा शास्त्रे निरूपितम्, किमित्याह— **सम्प्राप्नुवन्ति** लभन्ते **कल्याणं** भद्रम्, क्वेत्याह— **इहलोके परत्र** चेति प्रतीतरूपमेव॥१॥

एतदेव विवरीषुराह—

**क्षीराश्रवादिलब्ध्योघमासाद्य परमाक्षयम्।**
**कुर्वन्ति भव्यसत्त्वानामुपकारमनुत्तमम्॥२९॥** इति।

**क्षीरं** दुग्धं श्रोतृजनकर्णपुटेषु **आश्रवति** क्षरति भाषमाणो यस्यां लब्धौ सा **क्षीराश्रवा**, **आदिशब्दान्म**ध्वाश्रवा सर्पिराश्रवा अमृताश्रवा चेत्यादिको यो **लब्ध्योघो** लब्धिसङ्घातः तम् **आसाद्य** उपलभ्य **परमाक्षयं** परमं सर्वसुन्दरम् **अक्षयं** च अनेकदा उपजीव्यमानमपि अनुपरमस्वभावम्, किमित्याह— **कुर्वन्ति** विदधति **भव्यसत्त्वानाम्** उपकर्तुं योग्यानाम् **उपकारं** सम्यक्त्व-ज्ञान-चारित्रलाभलक्षणम् **अनुत्तमं** निर्वाणैकफलत्वेन अन्योपकारातिशायिनमिति॥२॥

तथा—

**मुच्यन्ते चाशु संसारादत्यन्तमसमञ्जसात्।**
**जन्म-मृत्यु-जरा-व्याधि-रोग-शोकाद्युपद्रुतात्॥३०॥** इति।

**मुच्यन्ते** परिहीयन्ते, **चः** समुच्चये, आशु शीघ्रं **संसारात्** भवात्, कीदृशादित्याह— **अत्यन्तम्** अतीव, **सङ्गतं** युक्तम् **अञ्जः** स्वरूपं यस्य स तथा, तत्प्रतिषेधादसमञ्जसस्तस्मात्, अत एव **जन्म-मृत्यु-जरा-व्याधि-रोग-शोकाद्युपद्रुतात्, जन्मना** प्रादुर्भावेन **मृत्युना** मरणेन **जरया** स्थविरभावलक्षणया **व्याधिना** कुष्ठादिरूपेण **शोकेन** इष्टवियोगप्रभवमनोदुःखविशेषेण **आदि**शब्दाच्छीत-वातादिभिरुपद्रवै**रुपद्रुतात्** विह्वलतामानीतादिति॥३॥

॥इति श्री**मुनिचन्द्रसूरि**विरचितायां **धर्मबिन्दुवृत्तौ यतिधर्मविधिः** पञ्चमोऽध्यायः समाप्तः॥५॥

## परिशिष्टं द्वितीयम्
## (२)

# उद्धरणसूचिः

**उद्धरणम्/प्रस्तुतग्रन्थे उद्धरणस्थानक्रमाङ्कः/ग्रन्थनाम/कर्ता/ग्रन्थस्थानम्**

**अट्ठारस पुरिसेसु**/३०/नीशीथसूत्रभाष्यम्/विशाखगणी म./३५०५

**अणसुहुमं वणसुहुमं**/६८/विशेषावश्यकभाष्यम्/जिनभद्रग. क्षमा./१३१०

**अण्णं पिव अप्पाणं**/८५/पञ्चवस्तु/हरिभद्रसू./१६६०

**अप्पा खलु सययं रक्खियव्वो**/६४/दशवैकालिकसूत्रम्/शय्यंभवसू./चू.२.१६

**अब्भत्था सुहजोगा**/८६/पञ्चवस्तु/हरिभद्रसू./१५९०

**अभिग्गहियसिज्जासिणियस्स**/८०/कल्पसूत्रम्/भद्रबाहुसू./२८१

**अविक्खा अणाणंदे**/५८/पञ्चसूत्रम्/५.३

**अविहिकया वरमकयं**/८२/विचारसारप्र./प्रद्युम्नसू.

**आज्ञाराद्धा विराद्धा च**/श्लो.१/वीतरागस्तोत्रम्/हेमचंद्रसू./१९.४

**आत्मप्रवृत्तावतिजागरूकः**/१/अध्यात्मकल्पद्रुमः/मुनिसुंदरसू./४.१

**आहप्पवहणिमित्तं**/८६/पञ्चवस्तु/हरिभद्रसू./१५८३

**इत्येते द्वाविंशति**/७७/तत्त्वार्थाधिगमसूत्रम्/उमास्वातिजीम./९.९

**इरियं न य सोहेइ**/३९/पिण्डनि./भद्रबाहुसू./२६४

**उचिए काले एसा**/८३-८४/पञ्चवस्तु/हरिभद्रसू./१५८३

**उवक्कमणं पुण एवं**/८३-८४/पञ्चवस्तु/हरिभद्रसू./१५८०

**उवसमेण हणे कोहं**/६८/दशवैकालिकसूत्रम्/शय्यंभवसू./८.३९

**एगभत्तं च भोयणं**/६२/दशवैकालिकसूत्रम्/शय्यंभवसू./६.२३

**एत्थ य आहारो खलु**/८५/पञ्चवस्तु/हरिभद्रसू./१६८६

**एमेए समणा मुत्ता**/१२/दशवैकालिकसूत्रम्/शय्यंभवसू./अध्य. १.३

**एवं क्रोधो मानो माया**/६९/प्रशमरतिः/उमास्वातिजीम./३०

**ओहेणं सव्व च्चिय**/८३-८४/पञ्चवस्तु/हरिभद्रसू./१३६७

**कषायमुक्तिः किल मुक्तिरेव**/८५/अज्ञात

**किं बहुणा इह जह जह**/७२/उपदेशरहस्यम्/उपा. यशोवि./२०१

**किं मे परो पासइ किं च**/७१/दशवैकालिकसूत्रम्/शय्यंभवसू./चू. २ गा. १३

**कुसीलवड्ढणं ठाणं**/४०/दशवैकालिकसूत्रम्/शय्यंभवसू./६.५९

**क्रोधः परितापकरः**/६९/प्रशमरतिः/उमास्वातिजीम./२६

**क्रोधात्प्रीतिविनाशं**/६९/प्रशमरतिः/उमास्वातिजीम./२५

**खुहं पिवासं दुस्सिज्जं**/७७/दशवैकालिकसूत्रम्/शय्यंभवसू./अ. ८.२७

**चक्रवत्परिवर्तन्ते**/१

**छहिं ठाणेहिं समणे निग्गंथे**/३९/स्थानाङ्गसूत्रम्/सुधर्मास्वामी/२, ६.५००

**जहा दुमस्स पुप्फेसु**/१२/दशवैकालिकसूत्रम्/शय्यंभवसू. /अध्य. १.२

**जा खलु पमत्तजोगा**/८६/पञ्चवस्तु/हरिभद्रसू./१५८६

**जा पुण एअविउत्ता**/८६/पञ्चवस्तु/हरिभद्रसू./१५८७

**जुगवं तु खिविज्जंतं**/८३-८४/पञ्चवस्तु/हरिभद्रसू./१५८२

**जे इमे भंते अज्जत्ताए समणा**/५८/भगवतीसूत्र/सुधर्मास्वामी/श.१४ उ.१०सू. १७

**जे इमे भंते अज्जत्ताए समणा**/५८/भगवतीसूत्र/सुधर्मास्वामी/श.१४ उ.१०सू. १७

**जो गिलाणं पडियरइ**/१६

**जो णवि वट्टइ रागे**/१/आवश्यकनिर्युक्तिः/भद्रबाहुसू./८०३

**जो पुव्वरत्तावरत्तकाले**/७१/दशवैकालिकसूत्रम्/शय्यंभवसू./चू. २ गा. १२

**तच्चिन्त्यं तत्कार्यं**/१४/प्रशमरतिः/उमास्वातिजीम./१४७

**तत्रास्यां यत्याराधनायां**/८७/यत्यन्तिमाराधना/उपा. समयसुन्दर

**तमेव सच्चं निस्संकं**/२६

**ता आराहेमु इमं**/८६/पञ्चवस्तु/हरिभद्रसू./१५९१

**तिविहातिवायकिरिया**/८६/पञ्चवस्तु/हरिभद्रसू./१५८४

**तिव्वरागा य जा भासा**/१८/पाक्षिकसूत्रम्/गणधर

**थोवं उवक्कमिज्जं**/८३-८४/पञ्चवस्तु/हरिभद्रसू./१५८१

**दुःखद्विट् सुखलिप्सु**/श्लो.३/प्रशमरतिः/उमास्वातिजीम./४०

**दुःखेष्वनुद्विग्नमनाः**/१/भगवद्गीता/कृष्णद्वैपायन व्यास/२.५६

**देशसर्वतो**/श्लो.१/तत्त्वार्थसूत्रम्/उमास्वातिजीम./७.२

**देहम्मि असंलिहिए**/८३-८४/पञ्चवस्तु/हरिभद्रसू./१५७७

**धन्यस्योपरि निपतति** /७/प्रशमरतिः/उमास्वातिजीम. /७०

**धम्मो मंगलमुक्कट्ठं**/३२/दशवैकालिकसूत्रम्/शय्यंभवसू. /१.१

**ध्यानं चैकाग्रसंवित्ति**/८२

**नगिणस्स वावि मुंड**/४८/दशवैकालिकसूत्रम्/शय्यंभवसू./६.६७

**नत्थि छुहाए सरिसा**/३९/पिण्डनि./भद्रबाहुसू./२६३

**नातपस्विनो योगः सिद्ध्यति**

**नातपस्विनो योगः सिद्ध्यति**/६२/पातंजलयोगभाष्यम्/व्यास

**नैवास्ति राजराज**/७२/प्रशमरतिः/उमास्वातिजीम./१२८

**पडिवज्जइ अ इमं जो**/८६/पञ्चवस्तु/हरिभद्रसू./१५८८

**परिवालिऊण विहिणा**/८३-८४/पञ्चवस्तु/हरिभद्रसू./१३६८

**प्रमत्तयोगात् प्राणव्यपरोपणं**/८७/तत्त्वार्थाधिगमसूत्रम्/उमास्वातिजीम./७.८

**बाह्यलिङ्गमसारं**/श्लो.१/षोडशक/हरिभद्रसू./१.४

**भण्णइ सच्चं एअं**/८६/पञ्चवस्तु/हरिभद्रसू./१५८५

**भवस्वरूपविज्ञानाद्**/श्लो.३/अध्यात्मसारः/यशोवि. उपा./५.१

**भावमवि संलिहेई**/८५/पञ्चवस्तु/हरिभद्रसू./१५९३

**भोगे रोगभयं**/७८/ वैराग्यशतकम्-३२

**ममं च सम्मं सहमाणस्स**/७७/स्थानाङ्गसूत्र/सुधर्मास्वामी/५.१.४०९

**मरणपडिआरभूआ**/८६/पञ्चवस्तु/हरिभद्रसू./१५८९

**महुगारसमा बुद्धा**/१२/दशवैकालिकसूत्रम्/शय्यंभवसू. /अध्य. १.५

**मायाशीलः पुरुषो**/६९/प्रशमरतिः/उमास्वातिजीम./२८

**मार्गाच्यवन**/७७/तत्त्वार्थाधिगमसूत्रम्/उमास्वातिजीम./९.८

**यत्किञ्चिच्चित्तमालिन्य**/८/उपमितभवप्रपञ्चकथा/सिद्धर्षि ग./प्रस्ताव-१

**वयं च वित्तिं लब्भा**/१२/दशवैकालिकसूत्रम्/शय्यंभवसू. /अध्य. १.४

**वासावासं पज्जोसविए भिक्खु**/१२/कल्पसूत्रम्/भद्रबाहुसू./२७६

**वासावासं पज्जोसविए भिक्खू य इच्छिज्जा**/३७/कल्पसूत्रम्/भद्रबाहुसू./२७४,२७५

**विगइं विगईभीओ**/४६/प्रत्याख्यानभाष्यम्/देवेन्द्रसूरिः/४०

**विधिकथनं विधिरागो**/६/अध्यात्मसारः/यशोवि. उपा. /२०.३२

**विभूसावत्तिअं चेअं**/४८/दशवैकालिकसूत्रम्/शय्यंभवसू./६.६५

**विभूसावत्तिअं भिक्खू**/४८/दशवैकालिकसूत्रम्/शय्यंभवसू./६.६६
**विहिणा उ थोवथोवं**/८३-८४/पञ्चवस्तु/हरिभद्रसू./१५७८
**श्रुतशीलविनयसन्दू**/६९/प्रशमरतिः/उमास्वातिजीम./२७
**स क्रोधमानमा**/६९/प्रशमरतिः/उमास्वातिजीम./२४
**संकिलेसकरं ठाणं**/१३/दशवैकालिकसूत्रम्/शय्यंभवसू. /५.१६
**संजोगा विप्पमुक्कस्स**/७५/उत्तराध्ययनसूत्रम्/स्थविर/१.१
**संलेहणा इहं खलु**/८३-८४/पञ्चवस्तु/हरिभद्रसू./१३६६
**संसारसागरमिमं**/५.६/उपदेशमाला/धर्मदासग./५२१
**सइसुहभावेण तहा**/८३-८४/पञ्चवस्तु/हरिभद्रसू./१५७९
**सञ्चिन्त्य कषायाणा**/६८/प्रशमरतिः/उमास्वातिजीम./१६६
**सन्त्यज्य लोकचिन्ता**/७२/प्रशमरतिः/उमास्वातिजीम./१२९
**सम्यग्दृष्टेर्महानुभावस्य**/श्लो.३/योगबिन्दुटीका
**सर्वविनाशाश्रयिणः**/६९/प्रशमरतिः/उमास्वातिजीम./२९
**सर्वे गत्यर्था ज्ञाना**/६०
**सव्वत्थापडिबद्धो**/८५/पञ्चवस्तु/हरिभद्रसू./१६६१
**सामिजीवादत्तं**/३१
**सिद्धेर्विश्वासिता मूलं**/२२/धर्मबिन्दुटीका/मुनिचन्द्रसू./५.२२
**सिवमयलमरुअ**/५८/शक्रस्तव
**सुयं मे आउसं तेणं भगवया एवमक्खायं**/५४/आचा. चूला/सुधर्मास्वामी/चूला-१ उ.२ सू.६३५
**सो तप्पभावओ च्चिअ**/८५/पञ्चवस्तु/हरिभद्रसू./१६६२
**सोही उज्जुअभूयस्स**/६४/उत्तराध्ययनसूत्रम्/स्थविर/३.१२
**हिंसानृतास्तेया**/श्लो.१/तत्त्वार्थसूत्रम्/उमास्वातिजीम./७.१
**हेट्ठिल्ला उवरिल्लेहिं**/५४/आचा. चूला भाष्य/६७०
**हेयं हानोचितं सर्वं**/श्लो.१/उपमितभवप्रपञ्चकथा/प्रस्ताव-१

**परिशिष्टं तृतीयम्**

**(३)**

# सन्दर्भग्रन्थसूचिः

**पुस्तक नाम/संपादक/संशोधक नाम/प्रकाशक नाम/प्रकाशन वर्ष/आवृत्ति/रिमार्क**


अध्यात्मकल्पद्रुमः/मुनिसुंदरसू./आनंदसागरसू./श्रेष्ठि देवचन्द्र लालभाई जैन पुस्तकोद्धार फंड, सुरत

अध्यात्मसारः

अभिधानराजेन्द्रकोश१-७/राजेन्द्रसू./अभिधानराजेन्द्रकोशप्रकाशनसंस्था,अमदावाद/ई.१९८५/२

आत्मधर्मः/रामचंद्रसू./योगतिलकसू./

आयारंगसुत्तं/जम्बूविजयजी म./महावीर जैन विद्यालय - बम्बई/वि. २०३३/प्रथम

उपमितभवप्रपञ्चकथा/चंद्रगुप्तसू./अनेकांत प्रकाशन

कल्पसूत्रम् सह किरणावली टीका/भद्रबाहुसू./उपा. धर्मसागरजी/वैराग्यरतिवि.प्रशमरतिवि./प्रवचन प्रकाशन,पुणे/द्वितीय/वि. २०५९

जैन लक्षणावली१-३/बालचंद्र शास्त्री/वीरसेवामंदिर,दिल्ली/ वि.२०२८/१

तत्त्वार्थाधिगमसूत्रम्/प्रशमरतिवि./प्रवचन प्रकाशन,पुणे/प्रथम

तत्त्वार्थाधिगमसूत्रम्/हीरालाल रसिकदास कापडिया/देवचन्द्र लालभाई जैन पुस्तकोद्धार फंड, सुरत/वि. १९८२/प्रथम

दशवैकालिकसूत्र (सार्थ)/भद्रंकरवि. पं./शशीकांत पोपटलाल ट्रस्ट,अमदावाद/वि.२०२८/२

दशवैकालिकसूत्र/शय्यंभवसू./पुण्यवि. म./प्राकृत टेक्स्ट सोसायटी/

धर्मबिन्दु सटीक/जम्बूविजयजी म./जिनशासन आराधना ट्रस्ट/वि. २०५०/प्रथम

निर्युक्तिपंचक/भद्रबाहुसू./कुसुमप्रज्ञा श्र./जैन विश्व भारती, लाडनूं/वि. २०५६

निर्युक्तिसंग्रह/जिनेंद्रसू./हर्षपुष्पामृत ग्रंथमाला,जामनगर/

पइण्णयसुत्ताइं -१/पुण्यविजयजी म, अमृतलाल भोजक/महावीर जैन विद्यालय - बम्बई/वि. २०४०/प्रथम

पवित्र कल्पसूत्र/पुण्यविजयजी म./ साराभाइ नवाब,अमदावाद/वि.२००८/प्रथम

पाक्षिकसूत्र/आनंदसागरसू./श्रेष्ठि देवचन्द्र लालभाई जैन पुस्तकोद्धार फंड, सुरत/वि.१९६७

प्रशमरतिः/वैराग्यरतिवि./श्रुतभवन संशोधन केंद्र,पुणे/वि. २०१४ /प्रथम

बन्धशतकप्रकरणम् सह टीका/शिवशर्मसू./हेमचन्द्रसू., चक्रेश्वरसू./वैराग्यरतिवि.प्रशमरतिवि./

प्रवचन प्रकाशन,पुणे/द्वितीय/वि.२०६१

भाष्यत्रय (सार्थ) /जैन श्रेयस्कर मंडळ, महेसाणा/वि. २०६३/प्रथम

भिक्षु आगम विषय कोश -१,२/महाप्रज्ञ आ./जैन विश्व भारती, लाडनूं/

योगबिन्दुटीका

वाचस्पत्यम्/तारानाथ भट्टाचार्य/चौखंबा संस्कृत सीरीझ,वाराणसी/वि.२०१८/१

वियाहपण्णत्तिसुत्तं १,२,३/पं. बेचरदास दोशी/महावीर जैन विद्यालय - बम्बई/सं. २०३०/प्रथम

वीतरागस्तोत्रम्/भगवानदास मनसुखभाइ/श्रीमद् राजचंद्र निजाभ्यास मंडप/वि. २०२२/ प्रथम

शताब्दि संभारणुं/स्मृतिग्रंथ कमिटी/संभवनाथ महाराज ट्रस्ट, कराड/वि. २०६२/प्रथम

शब्दरत्नमहोदधि १-२-३/ पं.मुक्तिवि./आ.श्रीवि.नीतिसू. जैनपुस्तकालय ट्रस्ट,,अमदावाद/३

शब्दार्थकौस्तुभ/द्वारकाप्रसाद शर्मा/रामनारायण लाल, इलाहबाद /ई.१९२८/१

शास्त्रसंदेशमाला/विनयरक्षितवि./शास्त्रसंदेशमाला/वि. २०६५/प्रथम

शुभाभिलाषा/प्रशमरतिवि./श्रुतभवन संशोधन केंद्र,पुणे/वि. २०१३ /प्रथम

श्राद्धविधिप्रकरणम् सह  टीका/रत्नशेखरसू./वैराग्यरतिवि.प्रशमरतिवि./प्रवचन प्रकाशन,पुणे/द्वितीय/वि.२०६१

षोडषाधिकारप्रकरण/वैराग्यरतिवि./प्रवचन प्रकाशन,पुणे/प्रथम

सभाष्यतत्त्वार्थाधिगमसूत्रम्/खूबचंद शास्त्री/परमश्रुतप्रभावकमंडल/वि.१९८९

समवायाङ्गसूत्रम्/पुण्यविजयजी म, जम्बूविजयजी म./महावीर जैन विद्यालय - बम्बई/वि. २०६१/प्रथम

सुभाषितरत्नभाण्डागारम्/नारायणराम आचार्य/वि.२०६८

स्थानाङ्गसूत्रम्/जम्बूविजयजी म./महावीर जैन विद्यालय - बम्बई/वि. २०६०/प्रथम

આ.શ્રીવિ.રામચંદ્રસૂ શ્રદ્ધાંજલિ વિશેષાંક/કાંતિલાલ ચુ. શાહ, કીરચંદ જે. શેઠ/જિનવાણી પ્રચારક ટ્રસ્ટ,મુંબઇ/વિ. ૨૦૫૦/પ્રથમ

તે મુનિ વંદો/રામચંદ્રસૂ./વૈરાગ્યરતિ વિ./પ્રવચન પ્રકાશન,પુણે/વિ. ૨૦૬૫/પ્રથમ

દીક્ષાયુગપ્રવર્તક/પ્રશમરતિ વિ./જિનવાણી પ્રચારક ટ્રસ્ટ,મુંબઇ/વિ. ૨૦૭૦/પ્રથમ

પોષ સુદ તેરસ/પ્રશમરતિ વિ./ જિનવાણી પ્રચારક ટ્રસ્ટ,મુંબઇ/ વિ. ૨૦૬૭/પ્રથમ

# प्राचीन श्रुतसंपदाना समुद्धार अर्थे
# समुदार सहयोग आपनारा महानुभावोनी नामावली

## श्रुतसमुद्धारक

श्रीमती चंद्रकलाबेन सुंदरलाल शेठ परिवार (मांगरोळ हाल-पुणे)

## श्रुतरत्न

श्री भाईश्री (इंटरनेशनल जैन फाउंडेशन - मुंबई)

## श्रुतसंरक्षक

श्री हसमुखभाई दीपचंदभाई गार्डी (दुबई)

श्री भवानीपुर जैन श्वेतांबर मूर्तिपूजक संघ (कोलकाता)

## श्रुतस्तंभ

पू.सा.श्री हर्षरेखाश्रीजी म.नी प्रेरणाथी श्रीमती वसंतप्रभाबेन कांतिलाल (पुणे)

पू.आ.श्री विश्वकल्याणसू.म.नी प्रेरणाथी श्री पद्ममणि जैन श्वे.मू. ट्रस्ट

पू.आ.श्री राजरत्नसू.म.नी प्रेरणाथी श्री जवाहरनगर श्वेतांबर मूर्तिपूजक जैन संघ (गोरेगाव, मुंबई)

## श्रुतभक्त

श्री शांतिकनक श्रमणोपासक ट्रस्ट (सुरत)

श्री हसमुखलाल चुनिलाल मोदी चॅरिटेबल ट्रस्ट (तारदेव, मुंबई)

श्री पार्श्वनाथ श्वेतांबर मूर्तिपूजक जैन संघ (मुंबई)

श्री ऋषभ अपार्टमेंट महिला मंडल, (प्रार्थना समाजमुंबई)

वर्धमानपुरा जैन संघ, (पुणे)

जैन श्वेतांबर मूर्तिपूजक संघ (दहाणुकरवाडी, कांदीवली, मुंबई)

सुजय गार्डन जैन संघ (पुणे)

**श्रुतप्रेमी**

श्री गोडीजी टेम्पल ट्रस्ट (पुणे)

श्री गोडीजी टेम्पल ट्रस्ट (पायधुनी-मुंबई)

श्री रतनचंदजी ताराचंदजी परमार (पुणे)

श्री मोहनलालजी गुलाबचंदजी बांठीया (पुणे)

श्री नगराजजी चंदनमलजी गुंदेचा (पुणे)

श्री नेमीचंदजी कचरमलजी जैन (पुणे)

श्री भरतभाई के. शाह (सुयोग ग्रुप-पुणे)

श्री सोहनलालजी टेकचंदजी गुंदेचा (पुणे)

श्री सुखीमलजी भीमराजजी छाजेड (पुणे)

श्री जैन आशापुरी ग्रुप (पुणे)

श्री महेन्द्र पुनातर (मुंबई)

श्री सुधीरभाई चंदुलाल कापडिया (मुंबई)

श्री संजयभाई महेन्द्रजी पुनातर (मुंबई)

प्रो.श्रीमती विमल बाफना (पुणे)

पू.सा.श्री नंदीयशाश्रीजी म.नी प्रेरणाथी श्री आंबावाडी जैन संघ (अहमदाबाद)

श्री गोवालीया टेंक जैन संघ (मुंबई)

श्री मोतीशा लालबाग रिलीजीयस चेरिटेबल ट्रस्ट (भायखला, मुंबई)

पू.आ.श्री तीर्थभद्रसू.म.नी प्रेरणाथी

जे. सी. कोठारी देरासर जैन श्वेतांबर मूर्तिपूजक संघ (मलाड, मुंबई)

श्री अशोक कालिदास कोटेचा (अमदावाद)

श्री विमलनाथस्वामी जैन श्वेतांबर मूर्तिपूजक जैन संघ (बिबवेवाडी, पुणे)

श्री मुनिसुव्रतस्वामी श्वेतांबर मूर्तिपूजक जैन संघ (लेकटाउन सो., पुणे)

श्री श्वेतांबर मूर्तिपूजक जैन संघ (सोलापुर बजार,पुणे)

श्री जैन श्वेतांबर मुर्तिपूजक गुजराती पंच (मालेगांव, नाशिक)

सायन जैन संघ (मुंबई)

## श्रुतोपासक

श्री अर्थप्राईड जैन संघ (मुंबई)

पू.आ.श्री कलाप्रभसागरसू.म.नी प्रेरणाथी श्री मुलुंड श्वेतांबर मूर्तिपूजक जैन संघ (मुंबई)

पू.मु.श्री जिनरत्नवि.म.नी प्रेरणाथी श्री आदिनाथ सोसायटी जैन संघ (पुणे)

पू.सा.श्री सूर्यमालाश्रीजी म.नी प्रेरणाथी श्री सम्यक् साधना रत्नत्रय आराधक ट्रस्ट (अमदावाद)

पू. उपा. श्री जितेंद्रमुनिजी म.नी प्रेरणाथी श्रीमती सीमा जैन (होशियारपुर, पंजाब)

श्री वर्धमानस्वामी जैन चेरिटेबल ट्रस्ट (सदाशिव पेठ, पुणे)

पू.आ.श्री तीर्थभद्रसू.म.नी प्रेरणाथी मातुश्री कमळाबेन गिरधरलाल वोरा परिवार (खाखरेची-मुंबई) आयोजित उपधान तप समिति

पू.आ.श्री तीर्थभद्रसू.म.नी प्रेरणाथी मातुश्री मानुबेन माडण गुणसी गडा परिवार

(थोरीयारी- मुंबई) आयोजित उपधान तप समिति

## श्रुतानुरागी

श्री मुनिसुव्रतस्वामी श्वेतांबर मूर्तिपूजक जैन संघ (फातिमानगर, पुणे)

श्री जैन आत्मानंद सभा (फरिदाबाद-पंजाब)

पू.मु.श्री जिनरत्नवि.म.नी प्रेरणाथी श्रीजिनरत्न आनंद ट्रस्ट

गोत्रीरोड श्वेतांबर मूर्तिपूजक जैन संघ (वडोदरा)

श्री श्वेतांबर मूर्तिपूजक जैन संघ (गोरेगाव, मुंबई)

श्री मुनिसुव्रतस्वामी जिनालय (मलाड, मुंबई)

## प्रकाशित ग्रंथरत्न एवं सौजन्यदाता

१. **मनःस्थिरीकरणप्रकरण**
(श्री पंचमहाजन मेरमांडवाडा, राजस्थान)

२. **दार्शनिक प्रकरण संग्रह**
(ला.द.संस्कृति विद्यामंदिर, अमदावाद)

३. **स्याद्वादपुष्पकलिका**
(श्री मर्चंट सोसायटी जैन संघ, अमदावाद)

४. **भवभावना अवचूरि**
(श्री रंजनविजयजी जैन पुस्तकालय, मालवाडा, राजस्थान)

५. **प्रशमरति प्रकरण**
(तपागच्छ रत्नत्रयी आराधक संघ, सुरत)

६. **मुक्तिवाद**
(तपागच्छ रत्नत्रयी आराधक संघ, सुरत)

७. **कल्पनिर्युक्ति**
(चंपालाल दानसुंग अजबाणी आयोजित चातुर्मास समिति)

८. **व्याप्तिपंचक**
(जूहुस्कीम जैन संघ + अकोला जैन संघ)

९. **सर्वसिद्धांतस्तव**
(रत्नशिला अपार्टमेंट, वापी)

१०. **प्राकृत व्याकरण**
(श्री आदेश्वर महाराज मंदिर ट्रस्ट, गोटीवाला धडा, पुणे)

११. **अर्धमागधी व्याकरण**
(श्री आदेश्वर महाराज मंदिर ट्रस्ट, गोटीवाला धडा, पुणे)

१२. **योगकल्पलता**
(श्री विमलनाथस्वामी जैन श्वेतांबर टेम्पल ट्रस्ट, बिबवेवाडी, पुणे)

१३. **बुद्धिसागर**
(श्री माटुंगा जैन श्वेतांबर मूर्तिपूजक तपगच्छ संघ, माटुंगा, मुंबई)

१४. **कल्पसूत्र (भाष्य-विशेषचूर्णिसहित) भाग-१**
(श्री पार्श्वभक्ति श्वेतांबर मूर्तिपूजक जैन संघ, पांडुरंगवाडी,
डोंबीवली (ई), ठाणा

१५. **कल्पसूत्र (भाष्य-विशेषचूर्णिसहित) भाग-२**
(श्री राजेश गोसलिया परिवार, मांगरोळ, सौराष्ट्र, हाल-दुबई)

१६. **कल्पसूत्र (भाष्य-विशेषचूर्णिसहित) भाग-३**
(श्री आदिनाथ श्वेतांबर मूर्तिपूजक जैन संघ, कानजीवाडी,
नवसारी)

१७. **नयामृतम्-२**
(तपोवन संस्कारपीठ, अमदावाद) (तपोवन संस्कारधाम, नवसारी)

१८. **श्रुतदीप-१**
(श्री घाटकोपर जैन श्वेतांबर मूर्तिपूजक तपगच्छ संघ, मुंबई)

१९. **स्तोत्रसंग्रह**
(श्री घाटकोपर जैन श्वेतांबर मूर्तिपूजक तपगच्छ संघ, मुंबई)

२०. **मंडलविचारप्रकरण**
(श्री चिंतामणी पार्श्वनाथ जैन श्वेतांबर मंदिर तथा मूर्तिपूजक संघ, नाशिक)

२१. **अष्टाह्निकाधुराख्यान सह अनुवाद**
(श्री चिंतामणी पार्श्वनाथ जैन श्वेतांबर मंदिर तथा मूर्तिपूजक संघ, नाशिक)

२२. **आत्मशुद्धिप्रकाश**
(श्री चिंतामणी पार्श्वनाथ जैन श्वेतांबर मंदिर तथा मूर्तिपूजक संघ, नाशिक)

२३. **धर्मबिन्दु पञ्चमाध्याय सङ्गतिवृत्ति सह**
(श्री शंखेश्वर पार्श्वनाथ आराधक संघ, पुखराज रायचंद आराधना भवन,
साबरमती)

२४. **लक्षणसंग्रह**
(श्री जैन श्वेतांबर मूर्तिपूजक तपगच्छ संघ, गोकाक)


॥ सुयं मे आउसं ॥
श्रुतभवन संशोधन केन्द्र